छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अनु॑ स्व॒धाम॑क्षर॒न्नापो॑ अ॒स्याव॑र्धत॒ मध्य॒ आ ना॒व्या॑नाम् । स॒ध्री॒चीने॑न॒ मन॑सा॒ तमि॑न्द्र॒ ओजि॑ष्ठेन॒ हन्म॑नाहन्न॒भि द्यून् ॥

The Mantra without meters (Sanskrit)

अनु स्वधामक्षरन्नापो अस्यावर्धत मध्य आ नाव्यानाम् । सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥

The Mantra's transliteration in English

anu svadhām akṣarann āpo asyāvardhata madhya ā nāvyānām | sadhrīcīnena manasā tam indra ojiṣṭhena hanmanāhann abhi dyūn ||

The Pada Paath (Sanskrit)

अनु॑ । स्व॒धाम् । अ॒क्ष॒र॒न् । आपः॑ । अ॒स्य॒ । अव॑र्धत । मध्ये॑ । आ । ना॒व्या॑नाम् । स॒ध्री॒चीने॑न । मन॑सा । तम् । इन्द्रः॑ । ओजि॑ष्ठेन । हन्म॑ना । अ॒ह॒न् । अ॒भि । द्यून् ॥

The Pada Paath - transliteration

anu | svadhām | akṣaran | āpaḥ | asya | avardhata | madhye | ā | nāvyānām | sadhrīcīnena | manasā | tam | indraḥ | ojiṣṭhena | hanmanā | ahan | abhi | dyūn

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-033/mantra-rig-01-033-012

MANTRA NUMBER:

Mantra 12 of Sukta 33 of Mandal 1 of Rig Veda
Mantra 2 of Varga 3 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 45 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

न्या॑विध्यदिली॒बिश॑स्य दृ॒ळ्हा वि शृ॒ङ्गिण॑मभिन॒च्छुष्ण॒मिन्द्र॑: । याव॒त्तरो॑ मघव॒न्याव॒दोजो॒ वज्रे॑ण॒ शत्रु॑मवधीः पृत॒न्युम् ॥

The Mantra without meters (Sanskrit)

न्याविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः । यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥

The Mantra's transliteration in English

ny āvidhyad ilībiśasya dṟḻhā vi śṛṅgiṇam abhinac chuṣṇam indraḥ | yāvat taro maghavan yāvad ojo vajreṇa śatrum avadhīḥ pṛtanyum ||

The Pada Paath (Sanskrit)

नि । अ॒वि॒ध्य॒त् । इ॒ली॒बिश॑स्य । दृ॒ळ्हा । वि । शृ॒ङ्गिण॑म् । अ॒भि॒न॒त् । शुष्ण॑म् । इन्द्र॑: । याव॑त् । तर॑: । म॒घ॒ऽव॒न् । याव॑त् । ओज॑: । वज्रे॑ण । शत्रु॑म् । अ॒व॒धीः॒ । पृ॒त॒न्युम् ॥

The Pada Paath - transliteration

ni | avidhyat | ilībiśasya | dṛḷhā | vi | śṛṅgiṇam | abhinat | śuṣṇam | indraḥ | yāvat | taraḥ | magha-van | yāvat | ojaḥ | vajreṇa | śatrum | avadhīḥ | pṛtanyum

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-033/mantra-rig-01-033-013

MANTRA NUMBER:

Mantra 13 of Sukta 33 of Mandal 1 of Rig Veda
Mantra 3 of Varga 3 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 46 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒भि सि॒ध्मो अ॑जिगादस्य॒ शत्रू॒न्वि ति॒ग्मेन॑ वृष॒भेणा॒ पुरो॑ऽभेत् । सं वज्रे॑णासृजद्वृ॒त्रमिन्द्र॒: प्र स्वां॑ म॒तिम॑तिर॒च्छाश॑दानः ॥

The Mantra without meters (Sanskrit)

अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् । सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥

The Mantra's transliteration in English

abhi sidhmo ajigād asya śatrūn vi tigmena vṛṣabheṇā puro 'bhet | saṁ vajreṇāsṛjad vṛtram indraḥ pra svām matim atirac chāśadānaḥ ||

The Pada Paath (Sanskrit)

अ॒भि । सि॒ध्मः । अ॒जि॒गा॒त् । अ॒स्य॒ । शत्रू॑न् । वि । ति॒ग्मेन॑ । वृ॒ष॒भेण॑ । पुर॑: । अ॒भे॒त् । सम् । वज्रे॑ण । अ॒सृ॒ज॒त् । वृ॒त्रम् । इन्द्र॑: । प्र । स्वाम् । म॒तिम् । अ॒ति॒र॒त् । शाश॑दानः ॥

The Pada Paath - transliteration

abhi | sidhmaḥ | ajigāt | asya | śatrūn | vi | tigmena | vṛṣabheṇa | puraḥ | abhet | sam | vajreṇa | asṛjat | vṛtram | indraḥ | pra | svām | matim | atirat | śāśadānaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-033/mantra-rig-01-033-014

MANTRA NUMBER:

Mantra 14 of Sukta 33 of Mandal 1 of Rig Veda
Mantra 4 of Varga 3 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 47 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

आव॒: कुत्स॒मिन्द्र॒ यस्मि॒ञ्चा॒कन्प्रावो॒ युध्य॑न्तं वृ॒ष॒भं दश॑द्युम् । श॒फच्यु॑तो रे॒णुर्न॑क्षत॒ द्यामुच्छ्वै॑त्रे॒यो नृ॒षाह्या॑य तस्थौ ॥

The Mantra without meters (Sanskrit)

आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् । शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥

The Mantra's transliteration in English

āvaḥ kutsam indra yasmiñ cākan prāvo yudhyantaṁ vṛṣabhaṁ daśadyum | śaphacyuto reṇur nakṣata dyām uc chvaitreyo nṛṣāhyāya tasthau ||

The Pada Paath (Sanskrit)

आव॑: । कु॒त्स॑म् । इ॒न्द्र॒ । यस्मि॑न् । चा॒कन् । प्र । आ॒व॒: । युध्य॑न्तम् । वृ॒ष॒भम् । दश॑ऽद्युम् । श॒फऽच्यु॑तः । रे॒णुः । न॒क्ष॒त॒ । द्याम् । उत् । श्वै॒त्रे॒यः । नृ॒ऽसह्या॑य । त॒स्थौ॒ ॥

The Pada Paath - transliteration

āvaḥ | kutsam | indra | yasmin | cākan | pra | āvaḥ | yudhyantam | vṛṣabham | daśa-dyum | śapha-cyutaḥ | reṇuḥ | nakṣata | dyām | ut | śvaitreyaḥ | nṛ-sahyāya | tasthau

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-033/mantra-rig-01-033-015

MANTRA NUMBER:

Mantra 15 of Sukta 33 of Mandal 1 of Rig Veda
Mantra 5 of Varga 3 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 48 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- इन्द्रः

छन्दः (Chhand) :- भुरिक्पङ्क्ति

स्वरः (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् । ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥

The Mantra without meters (Sanskrit)

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम् । ज्योक्चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः ॥

The Mantra's transliteration in English

āvaḥ śamaṁ vṛṣabhaṁ tugryāsu kṣetrajeṣe maghavañ chvitryaṁ gām | jyok cid atra tasthivāṁso akrañ chatrūyatām adharā vedanākaḥ ||

The Pada Paath (Sanskrit)

आवः । शमम् । वृषभम् । तुग्र्यासु । क्षेत्रऽजेषे । मघऽवन् । श्वित्र्यम् । गाम् । ज्योक् । चित् । अत्र । तस्थिऽवांसः । अक्रन् । शत्रुऽयताम् । अधरा । वेदना । अकरित्यकः ॥

The Pada Paath - transliteration

āvaḥ | śamam | vṛṣabham | tugryāsu | kṣetra-jeṣe | magha-van | śvitryam | gām | jyok | cit | atra | tasthi-vāṃsaḥ | akran | śatru-yatām | adharā | vedanā | akar ity akaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-001

MANTRA NUMBER:

Mantra 1 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 1 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 49 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिश्चि॑न्नो अ॒द्या भ॑वतं नवेदसा वि॒भुर्वां॒ याम॑ उ॒त रा॒तिर॑श्विना । यु॒वोर्हि य॒न्त्रं हि॒म्येव॒ वास॑सोऽभ्यायं॒सेन्या॑ भवतं मनी॒षिभिः॑ ॥

The Mantra without meters (Sanskrit)

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना । युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः ॥

The Mantra's transliteration in English

triś cin no adyā bhavataṁ navedasā vibhur vāṁ yāma uta rātir aśvinā | yuvor hi yantraṁ himyeva vāsaso 'bhyāyaṁsenyā bhavatam manīṣibhiḥ ||

The Pada Paath (Sanskrit)

त्रिः । चि॒त् । नः॒ । अ॒द्य । भ॒व॒त॒म् । नवेदसा । वि॒ऽभुः । वा॒म् । यामः॑ । उ॒त । रा॒तिः । अ॒श्वि॒ना॒ । यु॒वोः । हि । य॒न्त्रम् । हि॒म्याऽइ॑व । वास॑सः । अ॒भि॒ऽआ॒यं॒सेन्या॑ । भ॒व॒त॒म् । म॒नी॒षिऽभिः॑ ॥

The Pada Paath - transliteration

triḥ | cit | naḥ | adya | bhavatam | navedasā | vi-bhuḥ | vām | yāmaḥ | uta | rātiḥ | aśvinā | yuvoḥ | hi | yantram | himyāiva | vāsasaḥ | abhi-āyaṃsenyā | bhavatam | manīṣi-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-002

MANTRA NUMBER:

Mantra 2 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 2 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 50 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रयः॑ प॒वयो॑ मधु॒वाह॑ने॒ रथे॒ सोम॑स्य वे॒नामनु॒ विश्व॒ इद्वि॑दुः । त्रयः॑ स्क॒म्भास॑ः स्कभि॒तास॑ आ॒रभे॒ त्रिर्नक्तं॑ या॒थस्त्रिर्व॑श्विना॒ दिवा॑ ॥

The Mantra without meters (Sanskrit)

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः । त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा ॥

The Mantra's transliteration in English

trayaḥ pavayo madhuvāhane rathe somasya venām anu viśva id viduḥ | trayaḥ skambhāsaḥ skabhitāsa ārabhe trir naktaṁ yāthas trir v aśvinā divā ||

The Pada Paath (Sanskrit)

त्रयः॑ । प॒वयः॑ । मधु॒ऽवाह॑ने । रथे॑ । सोम॑स्य । वे॒नाम् । अनु॑ । विश्वे॑ । इत् । वि॒दुः॒ । त्रयः॑ । स्क॒म्भासः॑ । स्क॒भि॒तासः॑ । आ॒ऽरभे॑ । त्रिः । नक्त॑म् । या॒थः । त्रिः । ऊँ॒ इति॑ । अ॒श्वि॒ना॒ । दिवा॑ ॥

The Pada Paath - transliteration

trayaḥ | pavayaḥ | madhu-vāhena | rathe | somasya | venām | anu | viśve | it | viduḥ | trayaḥ | skambhāsaḥ | skamitāsaḥ | ārabhe | triḥ | naktam | yāthaḥ | triḥ | oṃ iti | aśvinā | divā

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-003

MANTRA NUMBER:

Mantra 3 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 3 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 51 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् । त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥

The Mantra without meters (Sanskrit)

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् । त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥

The Mantra's transliteration in English

samāne ahan trir avadyagohanā trir adya yajñam madhunā mimikṣatam | trir vājavatīr iṣo aśvinā yuvaṁ doṣā asmabhyam uṣasaś ca pinvatam ||

The Pada Paath (Sanskrit)

समाने । अहन् । त्रिः । अवद्यऽगोहना । त्रिः । अद्य । यज्ञम् । मधुना । मिमिक्षतम् । त्रिः । वाजवतीः । इषः । अश्विना । युवम् । दोषा । अस्मभ्यम् । उषसः । च । पिन्वतम् ॥

The Pada Paath - transliteration

samāne | ahan | triḥ | avadya-gohanā | triḥ | adya | yajñam | madhunā | mimikṣatam | triḥ | vājavatīḥ | iṣaḥ | aśvinā | yuvam | doṣā | asmabhyam | uṣasaḥ | ca | pinvatam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-004

MANTRA NUMBER:

Mantra 4 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 4 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 52 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- भुरिक्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिर्व॒र्तिर्या॑तं॒ त्रिरनु॑व्रते ज॒ने त्रिः सु॑प्रा॒व्ये॑ त्रे॒धेव॑ शिक्षतम् । त्रिर्ना॒न्द्यं॑ वहतमश्विना यु॒वं त्रिः पृक्षो॑ अ॒स्मे अ॒क्षरे॑व पिन्वतम् ॥

The Mantra without meters (Sanskrit)

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् । त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥

The Mantra's transliteration in English

trir vartir yātaṁ trir anuvrate jane triḥ suprāvye tredheva śikṣatam | trir nāndyaṁ vahatam aśvinā yuvaṁ triḥ pṛkṣo asme akṣareva pinvatam ||

The Pada Paath (Sanskrit)

त्रिः । व॒र्तिः । या॒त॒म् । त्रिः । अनु॑ऽव्रते । जने॑ । त्रिः । सु॒प्र॒ऽअ॒व्ये॑ । त्रे॒धाऽइ॑व । शि॒क्ष॒त॒म् । त्रिः । ना॒न्द्य॑म् । व॒ह॒त॒म् । अ॒श्वि॒ना॒ । यु॒वम् । त्रिः । पृक्षः॑ । अ॒स्मे इति॑ । अ॒क्षरा॑ऽइव । पि॒न्व॒त॒म् ॥

The Pada Paath - transliteration

triḥ | vartiḥ | yātam | triḥ | anu-vrate | jane | triḥ | supra-avye | tredhāiva | śikṣatam | triḥ | nāndyam | vahatam | aśvinā | yuvam | triḥ | pṛkṣaḥ | asme iti | akṣarāiva | pinvatam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-005

MANTRA NUMBER:

Mantra 5 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 5 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 53 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिर्नो॑ र॒यिं व॑हतमश्विना यु॒वं त्रिर्दे॒वता॑ता॒ त्रिरु॒ताव॑तं॒ धियः॑। त्रिः सौ॑भग॒त्वं त्रिरु॒त श्रवां॑सि नस्त्रि॒ष्ठं वां॒ सूरे॑ दुहि॒ता रु॑ह॒द्रथ॑म्॥

The Mantra without meters (Sanskrit)

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः। त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथम्॥

The Mantra's transliteration in English

trir no rayiṁ vahatam aśvinā yuvaṁ trir devatātā trir utāvataṁ dhiyaḥ | triḥ saubhagatvaṁ trir uta śravāṁsi nas triṣṭhaṁ vāṁ sūre duhitā ruhad ratham ||

The Pada Paath (Sanskrit)

त्रिः। नः॑। र॒यिम्। व॒ह॒त॒म्। अ॒श्वि॒ना॒। यु॒वम्। त्रिः। दे॒वता॑ता। त्रिः। उ॒त। अ॒व॒त॒म्। धियः॑। त्रिः। सौ॒भ॒ग॒ऽत्वम्। त्रिः। उ॒त। श्रवां॑सि। नः॒। त्रि॒ऽस्थम्। वा॒म्। सूरे॑। दु॒हि॒ता। रु॒ह॒त्। रथ॑म्॥

The Pada Paath - transliteration

triḥ | naḥ | rayim | vahatam | aśvinā | yuvam | triḥ | devatātā | triḥ | uta | avatam | dhiyaḥ | triḥ | saubhaga-tvam | triḥ | uta | śravāṃsi | naḥ | triḥ-stham | vām | sūre | duhitā | ruhat | ratham

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-006

MANTRA NUMBER:

Mantra 6 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 6 of Varga 4 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 54 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्दः (Chhand) :- विराड्जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिर्नो॑ अश्विना दि॒व्यानि॑ भेष॒जा त्रिः पार्थि॑वानि॒ त्रिरु॑ दत्तम॒द्भ्यः । ओ॒मानं॑ शं॒योर्मम॑काय सू॒नवे॑ त्रि॒धातु॒ शर्म॑ वहतं शुभस्पती ॥

The Mantra without meters (Sanskrit)

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः । ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती ॥

The Mantra's transliteration in English

trir no aśvinā divyāni bheṣajā triḥ pārthivāni trir u dattam adbhyaḥ | omānaṁ śaṁyor mamakāya sūnave tridhātu śarma vahataṁ śubhas patī ||

The Pada Paath (Sanskrit)

त्रिः । नः॒ । अ॒श्वि॒ना॒ । दि॒व्यानि॑ । भे॒ष॒जा । त्रिः । पार्थि॑वान् । त्रिः । ऊँ॒ इति॑ । द॒त्तम् । अ॒त्ऽभ्यः । ओ॒मान॑म् । श॒म्ऽयोः । मम॑काय । सू॒नवे॑ । त्रि॒ऽधातु॑ । शर्म॑ । व॒ह॒त॒म् । शु॒भः॒ । प॒ती॒ इति॑ ॥

The Pada Paath - transliteration

triḥ | naḥ | aśvinā | divyāni | bheṣajā | triḥ | pārthivān | triḥ | oṃ iti | dattam | at-bhyaḥ | omānam | śam-yoḥ | mamakāya | sūnave | tri-dhātu | śamar | vahatam | śubhaḥ | patī

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-007

MANTRA NUMBER:

Mantra 7 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 1 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 55 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिर्नो॑ अश्विना यज॒ता दि॒वेदि॑वे॒ परि॑ त्रि॒धातु॑ पृथि॒वीम॑शायतम् । ति॒स्रो ना॑सत्या रथ्या परा॒वत॑ आ॒त्मेव॒ वात॒: स्वस॑राणि गच्छतम् ॥

The Mantra without meters (Sanskrit)

त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम् । तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम् ॥

The Mantra's transliteration in English

trir no aśvinā yajatā dive-dive pari tridhātu pṛthivīm aśāyatam | tisro nāsatyā rathyā parāvata ātmeva vātaḥ svasarāṇi gacchatam ||

The Pada Paath (Sanskrit)

त्रिः । न॒: । अ॒स्वि॒ना॒ । य॒ज॒ता । दि॒वेऽदि॑वे । परि॑ । त्रि॒ऽधातु॑ । पृ॒थि॒वीम् । अ॒शा॒य॒त॒म् । ति॒स्रः । ना॒स॒त्या॒ । र॒थ्या॒ । प॒रा॒ऽवत॑: । आ॒त्माऽइ॑व । वात॒: । स्वस॑राणि । ग॒च्छ॒त॒म् ॥

The Pada Paath - transliteration

triḥ | naḥ | asvinā | yajatā | dive--dive | pari | tri-dhātu | pṛthivīm | aśāyatam | tisraḥ | nāsatyā | rathyā | parāvataḥ | ātmāiva | vātaḥ | svasarāṇi | gacchatam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-008

MANTRA NUMBER:

Mantra 8 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 2 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 56 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रिर॑श्विना सिन्धु॑भिः स॒प्तमा॑तृभि॒स्त्रय॑ आहा॒वास्त्रे॒धा ह॒विष्कृ॒तम् । ति॒स्रः पृ॑थि॒वीरु॒परि॑ प्र॒वा दि॒वो नाकं॑ रक्षेथे॒ द्युभि॑र॒क्तुभि॑र्हि॒तम् ॥

The Mantra without meters (Sanskrit)

त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रय आहावास्त्रेधा हविष्कृतम् । तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम् ॥

The Mantra's transliteration in English

trir aśvinā sindhubhiḥ saptamātṛbhis traya āhāvās tredhā haviṣ kṛtam | tisraḥ pṛthivīr upari pravā divo nākaṁ rakṣethe dyubhir aktubhir hitam ||

The Pada Paath (Sanskrit)

त्रिः । अ॒श्वि॒ना॒ । सिन्धु॑ऽभिः । स॒प्तमा॑तृऽभिः । त्रयः॑ । आ॒ऽहा॒वाः । त्रे॒धा । ह॒विः । कृ॒तम् । ति॒स्रः । पृ॒थि॒वीः । उ॒परि॑ । प्र॒वा । दि॒वः । नाक॑म् । र॒क्षे॒थे॒ इति॑ । द्युऽभिः॑ । अ॒क्तुऽभिः॑ । हि॒तम् ॥

The Pada Paath - transliteration

triḥ | āśvinā | sindhu-bhiḥ | saptamātṛ-bhiḥ | trayaḥ | āhāvāḥ | tredhā | haviḥ | kṛtam | tisraḥ | pṛthivīḥ | upari | pravā | divaḥ | nākam | rakṣetheiti | dyu-bhiḥ | aktu-bhiḥ | hitam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-009

MANTRA NUMBER:

Mantra 9 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 3 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 57 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्दः (Chhand) :- स्वराट्पङ्क्ति

स्वरः (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

क्व१॒॑ त्री च॒क्रा त्रि॒वृतो॒ रथ॑स्य॒ क्व१॒॑ त्रयो॑ व॒न्धुरो॒ ये सनी॑ळाः । क॒दा योगो॑ वा॒जिनो॒ रास॑भस्य॒ येन॑ य॒ज्ञं ना॑सत्योपया॒थः ॥

The Mantra without meters (Sanskrit)

क्व त्री चक्रा त्रिवृतो रथस्य क्व त्रयो वन्धुरो ये सनीळाः । कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ॥

The Mantra's transliteration in English

kva trī cakrā trivṛto rathasya kva trayo vandhuro ye sanī̱ḻāḥ | kadā yogo vājino rāsabhasya yena yajñaṁ nāsatyopayāthaḥ ||

The Pada Paath (Sanskrit)

क्व॑ । त्री । च॒क्रा । त्रि॒ऽवृतः॑ । रथ॑स्य । क्व॑ । त्रयः॑ । व॒न्धुरः॑ । ये । सऽनी॑ळाः । क॒दा । योगः॑ । वा॒जिनः॒ । रास॑भस्य । येन॑ । य॒ज्ञम् । ना॒स॒त्या॒ । उ॒प॒ऽया॒थः ॥

The Pada Paath - transliteration

kva | trī | cakrā | tri-vṛtaḥ | rathasya | kva | trayaḥ | vandhuraḥ | ye | sa-nīḻāḥ | kadā | yogaḥ | vājinaḥ | rāsabhasya | yena | yajñam | nāsatyā | upa-yāthaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-010

MANTRA NUMBER:

Mantra 10 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 4 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 58 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः । युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥

The Mantra without meters (Sanskrit)

आ नासत्या गच्छतं हूयते हविर्मध्वः पिबतं मधुपेभिरासभिः । युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ॥

The Mantra's transliteration in English

ā nāsatyā gacchataṁ hūyate havir madhvaḥ pibatam madhupebhir āsabhiḥ | yuvor hi pūrvaṁ savitoṣaso ratham ṛtāya citraṁ ghṛtavantam iṣyati ||

The Pada Paath (Sanskrit)

आ । नासत्या । गच्छतम् । हूयते । हविः । मध्वः । पिबतम् । मधुऽपेभिः । आसऽभिः । युवोः । हि । पूर्वम् । सविता । उषसः । रथम् । ऋताय । चित्रम् । घृतऽवन्तम् । इष्यति ॥

The Pada Paath - transliteration

ā | nāsatyā | gacchatam | hūyate | haviḥ | madhvaḥ | pibatam | madhu-pebhiḥ | āsa-bhiḥ | yuvoḥ | hi | pūrvam | savitā | uṣasaḥ | ratham | ṛtāya | citram | ghṛta-vantam | iṣyati

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-011

MANTRA NUMBER:

Mantra 11 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 5 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 59 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ ना॑सत्या त्रि॒भिरे॑काद॒शैरि॒ह दे॒वेभि॑र्यातं मधु॒पेय॑मश्विना । प्रायु॒स्तारि॑ष्टं॒ नी रपां॑सि मृक्षतं॒ सेध॑तं॒ द्वेषो॒ भव॑तं सचा॒भुवा॑ ॥

The Mantra without meters (Sanskrit)

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना । प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥

The Mantra's transliteration in English

ā nāsatyā tribhir ekādaśair iha devebhir yātam madhupeyam aśvinā | prāyus tāriṣṭaṁ nī rapāṁsi mṛkṣataṁ sedhataṁ dveṣo bhavataṁ sacābhuvā ||

The Pada Paath (Sanskrit)

आ । ना॒स॒त्या॒ । त्रि॒भिः । ए॒का॒द॒शैः । इ॒ह । दे॒वेभिः॑ । या॒त॒म् । म॒धु॒ऽपेय॑म् । अ॒श्वि॒ना॒ । प्र । आयुः॑ । तारि॑ष्टम् । निः । रपां॑सि । मृ॒क्ष॒त॒म् । सेध॑तम् । द्वेषः॑ । भव॑तम् । स॒चा॒ऽभुवा॑ ॥

The Pada Paath - transliteration

ā | nāsatyā | tribhiḥ | ekādaśaiḥ | iha | devebhiḥ | yātam | madhu-peyam | aśvinā | pra | āyuḥ | tāriṣṭam | niḥ | rapāṃsi | mṛkṣatam | sedhatam | dveṣaḥ | bhavatam | sacābhuvā

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-034/mantra-rig-01-034-012

MANTRA NUMBER:

Mantra 12 of Sukta 34 of Mandal 1 of Rig Veda
Mantra 6 of Varga 5 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 60 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नो॑ अश्विना त्रि॒वृता॒ रथे॑ना॒र्वाञ्चं॑ र॒यिं व॑हतं सु॒वीर॑म् । शृ॒ण्वन्ता॑ वा॒मव॑से जोहवीमि वृ॒धे च॑ नो भवतं॒ वाज॑सातौ ॥

The Mantra without meters (Sanskrit)

आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् । शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥

The Mantra's transliteration in English

ā no aśvinā trivṛtā rathenārvāñcaṁ rayiṁ vahataṁ suvīram | śṛṇvantā vām avase johavīmi vṛdhe ca no bhavataṁ vājasātau ||

The Pada Paath (Sanskrit)

आ । नः॒ । अ॒श्वि॒ना॒ । त्रि॒ऽवृता॑ । रथे॑न । अ॒र्वाञ्च॑म् । र॒यिम् । व॒ह॒त॒म् । सु॒ऽवीर॑म् । शृ॒ण्वन्ता॑ । वा॒म् । अव॑से । जो॒ह॒वी॒मि॒ । वृ॒धे । च॒ । नः॒ । भ॒व॒त॒म् । वाज॑ऽसातौ ॥

The Pada Paath - transliteration

ā | naḥ | aśvinā | tri-vṛtā | rathena | arvāñcam | rayim | vahatam | su-vīram | śṛṇvantā | vām | avase | johavīmi | vṛdhe | ca | naḥ | bhavatam | vāja-sātau

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-001

MANTRA NUMBER:

Mantra 1 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 1 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 61 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- अग्निर्मित्रावरुणौ, रात्रिः, सविता

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ह्वया॑म्य॒ग्निं प्र॑थ॒मं स्व॒स्तये॒ ह्वया॑मि मि॒त्रावरु॑णावि॒हाव॑से । ह्वया॑मि॒ रात्रीं॒ जग॑तो नि॒वेश॑नीं॒ ह्वया॑मि दे॒वं स॑वि॒तार॑मू॒तये॑ ॥

The Mantra without meters (Sanskrit)

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे । ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये ॥

The Mantra's transliteration in English

hvayāmy agnim prathamaṁ svastaye hvayāmi mitrāvaruṇāv ihāvase | hvayāmi rātrīṁ jagato niveśanīṁ hvayāmi devaṁ savitāram ūtaye ||

The Pada Paath (Sanskrit)

ह्वया॑मि । अ॒ग्निम् । प्र॒थ॒मम् । स्व॒स्तये॑ । ह्वया॑मि । मि॒त्रावरु॑णौ । इ॒ह । अव॑से । ह्वया॑मि । रात्री॑म् । जग॑तः । नि॒वेश॑नीम् । ह्वया॑मि । दे॒वम् । स॒वि॒तार॑म् । ऊ॒तये॑ ॥

The Pada Paath - transliteration

hvayāmi | agnim | prathamam | svastaye | hvayāmi | mitrāvaruṇau | iha | avase | hvayāmi | rātrīm | jagataḥ | niveśanīm | hvayāmi | devam | savitāram | ūtaye

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-002

MANTRA NUMBER:

Mantra 2 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 2 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 62 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्दः (Chhand) :- विराट्त्रिस्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ कृष्णेन॒ रज॑सा॒ वर्त॑मानो निवे॒शय॑न्न॒मृतं॒ मर्त्यं॑ च । हि॒र॒ण्यये॑न सवि॒ता रथे॒ना दे॒वो या॑ति॒ भुव॑नानि॒ पश्य॑न् ॥

The Mantra without meters (Sanskrit)

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

The Mantra's transliteration in English

ā kṛṣṇena rajasā vartamāno niveśayann amṛtam martyaṁ ca | hiraṇyayena savitā rathenā devo yāti bhuvanāni paśyan ||

The Pada Paath (Sanskrit)

आ । कृष्णेन॑ । रज॑सा । वर्त॑मानः । नि॒ऽवे॒शय॑न् । अ॒मृत॑म् । मर्त्य॑म् । च॒ । हि॒र॒ण्यये॑न । स॒वि॒ता रथे॒न॑ । आ । दे॒वः । या॒ति॒ । भुव॑नानि । पश्य॑न् ॥

The Pada Paath - transliteration

ā | kṛṣṇena | rajasā | vartamānaḥ | ni-veśayan | amṛtam | martyam | ca | hiraṇyayena | savitā rathena | ā | devaḥ | yāti | bhuvanāni | paśyan

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-003

MANTRA NUMBER:

Mantra 3 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 3 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 63 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

याति॑ दे॒वः प्र॒वता॑ या॒त्यु॒द्वता॑ याति॑ शु॒भ्राभ्यां॑ यज॒तो हरि॑भ्याम् । आ दे॒वो या॑ति सवि॒ता प॑रा॒वतोऽप॒ विश्वा॑ दु॒रि॒ता बाध॑मानः ॥

The Mantra without meters (Sanskrit)

याति देवः प्रवता यात्युद्वता याति शुभ्राभ्यां यजतो हरिभ्याम् । आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥

The Mantra's transliteration in English

yāti devaḥ pravatā yāty udvatā yāti śubhrābhyāṁ yajato haribhyām | ā devo yāti savitā parāvato 'pa viśvā duritā bādhamānaḥ ||

The Pada Paath (Sanskrit)

याति॑ । दे॒वः । प्र॒ऽवता॑ । याति॑ । उ॒त्ऽवता॑ । याति॑ । शु॒भ्राभ्या॑म् । य॒ज॒तः । हरि॑ऽभ्याम् । आ । दे॒वः । या॒ति॒ । स॒वि॒ता । प॒रा॒ऽवतः॑ । अप॑ । विश्वा॑ । दुः॒ऽइ॒ता । बाध॑मानः ॥

The Pada Paath - transliteration

yāti | devaḥ | pra-vatā | yāti | ut-vatā | yāti | śubhrābhyām | yajataḥ | hari-bhyām | ā | devaḥ | yāti | savitā | parāvataḥ | apa | viśvā | duḥ-itā | bādhamānaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-004

MANTRA NUMBER:

Mantra 4 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 4 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 64 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒भीवृ॑तं॒ कृश॑नैर्वि॒श्वरू॑पं॒ हिर॑ण्यशम्यं यज॒तो बृ॒हन्त॑म्। आस्था॒द्रथं॑ सवि॒ता चि॒त्रभा॑नुः कृ॒ष्णा रजां॑सि॒ तवि॑षीं॒ दधा॑नः॥

The Mantra without meters (Sanskrit)

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम्। आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः॥

The Mantra's transliteration in English

abhīvṛtaṁ kṛśanair viśvarūpaṁ hiraṇyaśamyaṁ yajato bṛhantam | āsthād rathaṁ savitā citrabhānuḥ kṛṣṇā rajāṁsi taviṣīṁ dadhānaḥ ||

The Pada Paath (Sanskrit)

अ॒भिऽवृ॑तम्। कृश॑नैः। वि॒श्वऽरू॑पम्। हिर॑ण्यऽशम्यम्। य॒ज॒तः। बृ॒हन्त॑म्। आ। अ॒स्था॒त्। रथ॑म्। स॒वि॒ता। चि॒त्रऽभा॑नुः। कृ॒ष्णा। रजां॑सि। तवि॑षीम्। दधा॑नः॥

The Pada Paath - transliteration

abhi-vṛtam | kṛśanaiḥ | viśva-rūpam | hiraṇya-śamyam | yajataḥ | bṛhantam | ā | asthāt | ratham | savitā | citra-bhānuḥ | kṛṣṇā | rajāṃsi | taviṣīm | dadhānaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-005

MANTRA NUMBER:

Mantra 5 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 5 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 65 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वि जना॑ञ्छ्या॒वाः शि॑ति॒पादो॑ अख्य॒न्रथं॒ हिर॑ण्यप्रउगं॒ वह॑न्तः । शश्व॒द्विशः॑ सवि॒तुर्दैव्य॑स्यो॒पस्थे॒ विश्वा॒ भुव॑नानि तस्थुः ॥

The Mantra without meters (Sanskrit)

वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः । शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः ॥

The Mantra's transliteration in English

vi janāñ chyāvāḥ śitipādo akhyan rathaṁ hiraṇyapraügaṁ vahantaḥ | śaśvad viśaḥ savitur daivyasyopasthe viśvā bhuvanāni tasthuḥ ||

The Pada Paath (Sanskrit)

वि । जना॑न् । श्या॒वाः । शि॒ति॒ऽपादः॑ । अ॒ख्य॒न् । रथ॑म् । हिर॑ण्यऽप्रऽउ॒ग॒म् । वह॑न्तः । शश्व॑त् । विशः॑ । स॒वि॒तुः । दैव्य॑स्य । उ॒पऽस्थे॑ । विश्वा॑ । भुव॑नानि । त॒स्थुः॒ ॥

The Pada Paath - transliteration

vi | janān | śyāvāḥ | śiti-pādaḥ | akhyan | ratham | hiraṇya-pra-ugam | vahantaḥ | śaśvat | viśaḥ | savituḥ | daivyasya | upa-sthe | viśvā | bhuvanāni | tasthuḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-006

MANTRA NUMBER:

Mantra 6 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 6 of Varga 6 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 66 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ति॒स्रो द्यावः॑ सवि॒तुर्द्वा उ॒पस्थाँ॒ एका॑ य॒मस्य॒ भुव॑ने विरा॒षाट् । आ॒णिं न रथ्य॑म॒मृताधि॑ तस्थुरि॒ह ब्र॑वीतु॒ य उ॒ तच्चिके॑तत् ॥

The Mantra without meters (Sanskrit)

तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् । आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥

The Mantra's transliteration in English

tisro dyāvaḥ savitur dvā upasthām̐ ekā yamasya bhuvane virāṣāṭ | āṇiṁ na rathyam amṛtādhi tasthur iha bravītu ya u tac ciketat ||

The Pada Paath (Sanskrit)

ति॒स्रः । द्यावः॑ । स॒वि॒तुः । द्वौ । उ॒पऽस्था॑ । एका॑ । य॒मस्य॑ । भु॒व॑ने । वि॒रा॒षाट् । आ॒णिम् । न । रथ्य॑म् । अ॒मृता॑ । अधि॑ । त॒स्थुः॒ । इ॒ह । ब्र॒वी॒तु॒ । यः । उँ॒ इति॑ । तत् । चिके॑तत् ॥

The Pada Paath - transliteration

tisraḥ | dyāvaḥ | savituḥ | dvau | upa-sthā | ekā | yamasya | bhuvane | virāṣāṭ | āṇim | na | rathyam | amṛtā | adhi | tasthuḥ | iha | bravītu | yaḥ | oṃ iti | tat | ciketat

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-007

MANTRA NUMBER:

Mantra 7 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 1 of Varga 7 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 67 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

वि सु॒प॒र्णो अ॒न्तरि॑क्षाण्यख्यद्ग॒भी॒रवे॑पा॒ असु॑रः सु॒नी॒थः । क्वे॒३॒॑दानीं॒ सूर्यः॒ कश्चि॑केत कत॒मां द्यां र॒श्मिर॒स्या त॑तान ॥

The Mantra without meters (Sanskrit)

वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः । क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥

The Mantra's transliteration in English

vi suparṇo antarikṣāṇy akhyad gabhīravepā asuraḥ sunīthaḥ | kvedānīṁ sūryaḥ kaś ciketa katamāṁ dyāṁ raśmir asyā tatāna ||

The Pada Paath (Sanskrit)

वि । सु॒ऽप॒र्णः । अ॒न्तरि॑क्षाणि । अ॒ख्य॒त् । ग॒भी॒रऽवे॑पाः । असु॑रः । सु॒ऽनी॒थः । क्व॑ । इ॒दानी॒म् । सूर्यः॑ । कः । चि॒के॒त॒ । क॒त॒माम् । द्याम् । र॒श्मिः । अ॒स्य॒ । आ । त॒ता॒न॒ ॥

The Pada Paath - transliteration

vi | su-parṇaḥ | antarikṣāṇi | akhyat | gabhīra-vepāḥ | asuraḥ | su-nīthaḥ | kva | idānīm | sūryaḥ | kaḥ | ciketa | katamām | dyām | raśmiḥ | asya | ā | tatāna

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-008

MANTRA NUMBER:

Mantra 8 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 2 of Varga 7 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 68 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒ष्टौ व्य॑ख्यत्क॒कुभ॑: पृथि॒व्यास्त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न् । हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒द्द॒ध॒द्रत्ना॑ दा॒शुषे॒ वार्या॑णि ॥

The Mantra without meters (Sanskrit)

अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् । हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥

The Mantra's transliteration in English

aṣṭau vy akhyat kakubhaḥ pṛthivyās trī dhanva yojanā sapta sindhūn | hiraṇyākṣaḥ savitā deva āgād dadhad ratnā dāśuṣe vāryāṇi ||

The Pada Paath (Sanskrit)

अ॒ष्टौ । वि । अ॒ख्य॒त् । क॒कुभः॑ । पृ॒थि॒व्याः । त्री । धन्व॑ । योज॑ना । स॒प्त । सिन्धू॑न् । हि॒र॒ण्य॒ऽअ॒क्षः । स॒वि॒ता । दे॒वः । आ । अ॒गा॒त् । दध॑त् । रत्ना॑ । दा॒शुषे॑ । वार्या॑णि ॥

The Pada Paath - transliteration

aṣṭau | vi | akhyat | kakubhaḥ | pṛthivyāḥ | trī | dhanva | yojanā | sapta | sindhūn | hiraṇya-akṣaḥ | savitā | devaḥ | ā | agāt | dadhat | ratnā | dāśuṣe | vāryāṇi

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-009

MANTRA NUMBER:

Mantra 9 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 3 of Varga 7 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 69 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्दः (Chhand) :- निचृज्जगती

स्वरः (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

हिर॑ण्यपाणिः सवि॒ता विच॑र्षणिरु॒भे द्यावा॑पृथि॒वी अ॒न्तरी॑यते । अपामी॑वां॒ बाध॑ते॒ वेति॒ सूर्य॑म॒भि कृ॒ष्णेन॒ रज॑सा॒ द्याम॑ृणोति ॥

The Mantra without meters (Sanskrit)

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते । अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति ॥

The Mantra's transliteration in English

hiraṇyapāṇiḥ savitā vicarṣaṇir ubhe dyāvāpṛthivī antar īyate | apāmīvām bādhate veti sūryam abhi kṛṣṇena rajasā dyām ṛṇoti ||

The Pada Paath (Sanskrit)

हिर॑ण्यऽपाणिः । स॒वि॒ता । विऽच॑र्षणिः । उ॒भे इति॑ । द्यावा॑पृथि॒वी इति॑ । अ॒न्तः । ई॒य॒ते । अप॑ । अमी॑वाम् । बाध॑ते । वेति॑ । सूर्य॑म् । अ॒भि । कृ॒ष्णेन॑ । रज॑सा । द्याम् । ऋ॒णो॒ति ॥

The Pada Paath - transliteration

hiraṇya-pāṇiḥ | savitā | vi-carṣaṇiḥ | ubhe iti | dyāvāpṛthivī iti | antaḥ | īyate | apa | amīvām | bādhate | veti | sūryam | abhi | kṛṣṇena | rajasā | dyām | ṛṇoti

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-010

MANTRA NUMBER:

Mantra 10 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 4 of Varga 7 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 70 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

हिर॑ण्यहस्तो॒ असु॑रः सुनी॒थः सु॑मृळी॒कः स्ववाँ॑ यात्व॒र्वाङ् । अ॒प॒सेध॑न्र॒क्षसो॑ यातु॒धाना॒नस्था॑द्दे॒वः प्र॑तिदो॒षं गृ॑णा॒नः ॥

The Mantra without meters (Sanskrit)

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् । अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥

The Mantra's transliteration in English

hiraṇyahasto asuraḥ sunīthaḥ sumṛḻīkaḥ svavām̐ yātv arvāṅ | apasedhan rakṣaso yātudhānān asthād devaḥ pratidoṣaṁ gṛṇānaḥ ||

The Pada Paath (Sanskrit)

हिर॑ण्यऽहस्तः । असु॑रः । सु॒ऽनी॒थः । सु॒ऽमृ॒ळी॒कः । स्वऽवा॑न् । या॒तु॒ । अ॒र्वाङ् । अ॒प॒ऽसेध॑न् । र॒क्षसः॑ । या॒तु॒ऽधाना॑न् । अस्था॑त् । दे॒वः । प्र॑तिऽदो॒षम् । गृ॒णा॒नः ॥

The Pada Paath - transliteration

hiraṇya-hastaḥ | asuraḥ | su-nīthaḥ | su-mṛḻīkaḥ | sva-vān | yātu | arvāṅ | apa-sedham | rakṣasaḥ | yātu-dhānān | asthāt | devaḥ | prati-doṣam | gṛṇānaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-035/mantra-rig-01-035-011

MANTRA NUMBER:

Mantra 11 of Sukta 35 of Mandal 1 of Rig Veda
Mantra 5 of Varga 7 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 71 of Anuvaak 7 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- हिरण्यस्तूप आङ्गिरसः

देवता (Devataa) :- सविता

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥

The Mantra without meters (Sanskrit)

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे । तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥

The Mantra's transliteration in English

ye te panthāḥ savitaḥ pūrvyāso 'reṇavaḥ sukṛtā antarikṣe | tebhir no adya pathibhiḥ sugebhī rakṣā ca no adhi ca brūhi deva ||

The Pada Paath (Sanskrit)

ये । ते । पन्थाः । सवितरिति । पूर्व्यासः । अरेणवः । सुऽकृताः । अन्तरिक्षे । तेभिः । नः । अद्य । पथिऽभिः । सुऽगेभिः । रक्ष । च । नः । अधि । च । ब्रूहि । देव ॥

The Pada Paath - transliteration

ye | te | panthāḥ | savitariti | pūrvyāsaḥ | areṇavaḥ | su-kṛtāḥ | antarikṣe | tebhiḥ | naḥ | adya | pathi-bhiḥ | su-gebhiḥ | rakṣa | ca | naḥ | adhi | ca | brūhi | deva

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-001

MANTRA NUMBER:

Mantra 1 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 1 of Varga 8 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 1 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिगनुष्टुप्

स्वर: (Swar) :- गान्धारः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र वो॑ य॒ह्वं पु॑रू॒णां वि॒शां दे॑वय॒तीना॑म् । अ॒ग्निं सू॒क्तेभि॒र्वचो॑भिरीमहे॒ यं सी॒मिद॒न्य ईळ॑ते ॥

The Mantra without meters (Sanskrit)

प्र वो यह्वं पुरूणां विशां देवयतीनाम् । अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥

The Mantra's transliteration in English

pra vo yahvam purūṇāṁ viśāṁ devayatīnām | agniṁ sūktebhir vacobhir īmahe yaṁ sīm id anya īḻate ||

The Pada Paath (Sanskrit)

प्र । व॒ः । य॒ह्वम् । पु॒रू॒णाम् । वि॒शाम् । दे॒व॒ऽय॒तीना॑म् । अ॒ग्निम् । सु॒ऽउ॒क्तेभिः॑ । वचः॑ऽभिः । ई॒म॒हे॒ । यम् । सी॒म् । इत् । अ॒न्ये । ईळ॑ते ॥

The Pada Paath - transliteration

pra | vaḥ | yahvam | purūṇām | viśām | deva-yatīnām | agnim | su-uktebhiḥ | vacaḥ-bhiḥ | īmahe | yam | sīm | it | anye | īḷate

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-002

MANTRA NUMBER:

Mantra 2 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 2 of Varga 8 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 2 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्सतः पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

जना॑सो अ॒ग्निं द॑धिरे सहो॒वृधं॑ ह॒विष्म॑न्तो विधेम ते । स त्वं नो॑ अ॒द्य सु॒मना॑ इ॒हावि॒ता भवा॒ वाजे॑षु सन्त्य ॥

The Mantra without meters (Sanskrit)

जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते । स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥

The Mantra's transliteration in English

janāso agniṁ dadhire sahovṛdhaṁ haviṣmanto vidhema te | sa tvaṁ no adya sumanā ihāvitā bhavā vājeṣu santya ||

The Pada Paath (Sanskrit)

जना॑सः । अ॒ग्निम् । द॒धि॒रे॒ । स॒हः॒ऽवृध॑म् । ह॒विष्म॑न्तः । वि॒धे॒म॒ । ते॒ । सः । त्वम् । नः॒ । अ॒द्य । सु॒ऽमनाः॑ । इ॒ह । अ॒वि॒ता । भव॑ । वाजे॑षु । स॒न्त्य॒ ॥

The Pada Paath - transliteration

janāsaḥ | agnim | dadhire | sahaḥ-vṛdham | haviṣmantaḥ | vidhema | te | saḥ | tvam | naḥ | adya | su-manāḥ | iha | avitā | bhava | vājeṣu | santya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-003

MANTRA NUMBER:

Mantra 3 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 3 of Varga 8 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 3 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्पथ्याबृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र त्वा॑ दू॒तं वृ॑णीमहे॒ होता॑रं वि॒श्ववे॑दसम् । म॒हस्ते॑ स॒तो वि च॑रन्त्य॒र्चयो॑ दि॒वि स्पृ॑शन्ति भा॒नवः॑ ॥

The Mantra without meters (Sanskrit)

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् । महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥

The Mantra's transliteration in English

pra tvā dūtaṁ vṛṇīmahe hotāraṁ viśvavedasam | mahas te sato vi caranty arcayo divi spṛśanti bhānavaḥ ||

The Pada Paath (Sanskrit)

प्र । त्वा॒ । दू॒तम् । वृ॒णी॒म॒हे॒ । होता॑रम् । वि॒श्वऽवे॑दसम् । म॒हः । ते॒ । स॒तः । वि । च॒र॒न्ति॒ । अ॒र्चयः॑ । दि॒वि । स्पृ॒श॒न्ति॒ । भा॒नवः॑ ॥

The Pada Paath - transliteration

pra | tvā | dūtam | vṛṇīmahe | hotāram | viśva-vedasam | mahaḥ | te | sataḥ | vi | caranti | arcayaḥ | divi | spṛśanti | bhānavaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-004

MANTRA NUMBER:

Mantra 4 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 4 of Varga 8 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 4 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

दे॒वास॑स्त्वा॒ वरु॑णो मि॒त्रो अ॑र्य॒मा सं दू॒तं प्र॒त्नमि॑न्धते । विश्वं॒ सो अ॑ग्ने जयति॒ त्वया॒ धनं॒ यस्ते॑ द॒दाश॒ मर्त्यः॑ ॥

The Mantra without meters (Sanskrit)

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते । विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥

The Mantra's transliteration in English

devāsas tvā varuṇo mitro aryamā saṁ dūtam pratnam indhate | viśvaṁ so agne jayati tvayā dhanaṁ yas te dadāśa martyaḥ ||

The Pada Paath (Sanskrit)

दे॒वासः॑ । त्वा॒ । वरु॑णः । मि॒त्रः । अ॒र्य॒मा । सम् । दू॒तम् । प्र॒त्नम् । इ॒न्ध॒ते॒ । विश्व॑म् । सः । अ॒ग्ने॒ । ज॒य॒ति॒ । त्वया॑ । धन॑म् । यः । ते॒ । द॒दाश॑ । मर्त्यः॑ ॥

The Pada Paath - transliteration

devāsaḥ | tvā | varuṇaḥ | mitraḥ | aryamā | sam | dūtam | pratnam | indhate | viśvam | saḥ | agne | jayati | tvayā | dhanam | yaḥ | te | dadāśa | martyaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-005

MANTRA NUMBER:

Mantra 5 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 5 of Varga 8 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 5 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृद्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

म॒न्द्रो होता॑ गृ॒हप॑ति॒रग्ने॑ दू॒तो वि॒शाम॑सि । त्वे विश्वा॒ संग॑तानि व्र॒ता ध्रु॒वा यानि॑ दे॒वा अकृ॑ण्वत ॥

The Mantra without meters (Sanskrit)

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि । त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अकृण्वत ॥

The Mantra's transliteration in English

mandro hotā gṛhapatir agne dūto viśām asi | tve viśvā saṁgatāni vratā dhruvā yāni devā akṛṇvata ||

The Pada Paath (Sanskrit)

म॒न्द्रः । होता॑ । गृ॒हऽप॑तिः । अग्ने॑ । दू॒तः । वि॒शाम् । अ॒सि॒ । त्वे इति॑ । विश्वा॑ । सम्ऽग॑तानि । व्र॒ता । ध्रु॒वा । यानि॑ । दे॒वाः । अकृ॑ण्वत ॥

The Pada Paath - transliteration

mandraḥ | hotā | gṛha-patiḥ | agne | dūtaḥ | viśām | asi | tve iti | viśvā | sam-gatāni | vratā | dhruvā | yāni | devāḥ | akṛṇvata

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-006

MANTRA NUMBER:

Mantra 6 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 1 of Varga 9 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 6 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिग्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वे इद॑ग्ने सु॒भगे॑ यविष्ठ्य॒ विश्व॒मा हू॑यते ह॒विः । स त्वं नो॑ अ॒द्य सु॒मना॑ उ॒तापरं॒ यक्षि॑ दे॒वान्त्सु॒वीर्या॑ ॥

The Mantra without meters (Sanskrit)

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः । स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्या ॥

The Mantra's transliteration in English

tve id agne subhage yaviṣṭhya viśvam ā hūyate haviḥ | sa tvaṁ no adya sumanā utāparaṁ yakṣi devān suvīryā ||

The Pada Paath (Sanskrit)

त्वे । इत् । अ॒ग्ने॒ । सु॒भगे॑ । य॒वि॒ष्ठ्य॒ । विश्व॑म् । आ । हू॒य॒ते॒ । ह॒विः । सः । त्वम् । नः॒ । अ॒द्य । सु॒ऽमना॑ः । उ॒त । अ॒प॒रम् । यक्षि॑ । दे॒वान् । सु॒ऽवीर्या॑ ॥

The Pada Paath - transliteration

tve | it | agne | subhage | yaviṣṭhya | viśvam | ā | hūyate | haviḥ | saḥ | tvam | naḥ | adya | su-manāḥ | uta | aparam | yakṣi | devān | su-vīryā

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-007

MANTRA NUMBER:

Mantra 7 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 2 of Varga 9 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 7 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

तं घे॑मि॒त्था न॑म॒स्विन॒ उप॑ स्व॒राज॑मासते । होत्रा॑भिर॒ग्निं मनु॑षः॒ समि॑न्धते तिति॒र्वांसो॒ अति॒ स्रिधः॑ ॥

The Mantra without meters (Sanskrit)

तं घेमित्था नमस्विन उप स्वराजमासते । होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः ॥

The Mantra's transliteration in English

taṁ ghem itthā namasvina upa svarājam āsate | hotrābhir agnim manuṣaḥ sam indhate titirvāṁso ati sridhaḥ ||

The Pada Paath (Sanskrit)

तम् । घ॒ । ई॒म् । इ॒त्था । न॒म॒स्विनः॑ । उप॑ । स्व॒ऽराज॑म् । आ॒स॒ते॒ । होत्रा॑भिः । अ॒ग्निम् । मनु॑षः । सम् । इ॒न्ध॒ते॒ । ति॒ति॒र्वांसः॑ । अति॑ । स्रिधः॑ ॥

The Pada Paath - transliteration

tam | gha | īm | itthā | namasvinaḥ | upa | sva-rājam | āsate | hotrābhiḥ | agnim | manuṣaḥ | sam | indhate | titirvāṃsaḥ | ati | sridhaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-008

MANTRA NUMBER:

Mantra 8 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 3 of Varga 9 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 8 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- स्वराड्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

घ्नन्तो॑ वृ॒त्रमत॑र॒न्रोद॑सी अ॒प उ॒रु क्षया॑य चक्रिरे । भु॒व॒त्कण्वे॒ वृषा॑ द्यु॒म्न्याहु॑त॒: क्रन्द॒दश्वो॒ गवि॑ष्टिषु ॥

The Mantra without meters (Sanskrit)

घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे । भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु ॥

The Mantra's transliteration in English

ghnanto vṛtram ataran rodasī apa uru kṣayāya cakrire | bhuvat kaṇve vṛṣā dyumny āhutaḥ krandad aśvo gaviṣṭiṣu ||

The Pada Paath (Sanskrit)

घ्नन्त॑: । वृ॒त्रम् । अ॒त॒र॒न् । रोद॑सी॒ इति॑ । अ॒पः । उ॒रु । क्षया॑य । च॒क्रि॒रे॒ । भुव॑त् । कण्वे॑ । वृषा॑ । द्यु॒म्नी । आऽहु॑तः । क्रन्द॑त् । अश्व॑: । गोऽइ॑ष्टिषु ॥

The Pada Paath - transliteration

ghnantaḥ | vṛtram | ataran | rodasī iti | apaḥ | uru | kṣayāya | cakrire | bhuvat | kaṇve | vṛṣā | dyumnī | āhutaḥ | krandat | aśvaḥ | go--iṣṭiṣu

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-009

MANTRA NUMBER:

Mantra 9 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 4 of Varga 9 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 9 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृदुपरिष्टाद् बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

सं सीदस्व म॒हाँ अ॑सि॒ शोच॑स्व देव॒वीत॑मः । वि धू॒मम॑ग्ने अरु॒षं मि॑येध्य सृ॒ज प्र॑शस्त दर्श॒तम् ॥

The Mantra without meters (Sanskrit)

सं सीदस्व महाँ असि शोचस्व देववीतमः । वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥

The Mantra's transliteration in English

saṁ sīdasva mahām̐ asi śocasva devavītamaḥ | vi dhūmam agne aruṣam miyedhya sṛja praśasta darśatam ||

The Pada Paath (Sanskrit)

सम् । सी॒द॒स्व॒ । म॒हान् । अ॒सि॒ । शोच॑स्व । दे॒व॒ऽवीत॑मः । वि । धू॒मम् । अ॒ग्ने॒ । अ॒रु॒षम् । मि॒ये॒ध्य॒ । सृ॒ज । प्र॒ऽश॒स्त॒ । द॒र्श॒तम् ॥

The Pada Paath - transliteration

sam | sīdasva | mahān | asi | śocasva | deva-vītamaḥ | vi | dhūmam | agne | aruṣam | miyedhya | sṛja | pra-śasta | darsatam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-010

MANTRA NUMBER:

Mantra 10 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 5 of Varga 9 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 10 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृद्विष्टारपङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

यं त्वा॑ दे॒वासो॒ मन॑वे द॒धुरि॒ह यजि॑ष्ठं हव्यवाहन । यं कण्वो॒ मेध्या॑तिथिर्धन॒स्पृतं॒ यं वृषा॒ यमु॑पस्तु॒तः ॥

The Mantra without meters (Sanskrit)

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन । यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥

The Mantra's transliteration in English

yaṁ tvā devāso manave dadhur iha yajiṣṭhaṁ havyavāhana | yaṁ kaṇvo medhyātithir dhanaspṛtaṁ yaṁ vṛṣā yam upastutaḥ ||

The Pada Paath (Sanskrit)

यम् । त्वा॒ । दे॒वासः॑ । मन॑वे । द॒धुः । इ॒ह । यजि॑ष्ठम् । ह॒व्य॒ऽवा॒ह॒न॒ । यम् । कण्वः॑ । मेध्य॑ऽअतिथिः । ध॒न॒ऽस्पृत॑म् । यम् । वृषा॑ । यम् । उ॒प॒ऽस्तु॒तः ॥

The Pada Paath - transliteration

yam | tvā | devāsaḥ | manave | dadhuḥ | iha | yajiṣṭham | havya-vāhana | yam | kaṇvaḥ | medhya-atithiḥ | dhana-spṛtam | yam | vṛṣā | yam | upa-stutaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-011

MANTRA NUMBER:

Mantra 11 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 1 of Varga 10 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 11 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- निचृत्पथ्याबृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि । तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥

The Mantra without meters (Sanskrit)

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि । तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥

The Mantra's transliteration in English

yam agnim medhyātithiḥ kaṇva īdha ṛtād adhi | tasya preṣo dīdiyus tam imā ṛcas tam agniṁ vardhayāmasi ॥

The Pada Paath (Sanskrit)

यम् । अग्निम् । मेध्यऽअतिथिः । कण्वः । ईधे । ऋतात् । अधि । तस्य । प्र । इषः । दीदियुः । तम् । इमाः । ऋचः । तम् । अग्निम् । वर्धयामसि ॥

The Pada Paath - transliteration

yam | agnim | medhya-atithiḥ | kaṇvaḥ | īghe | ṛtāt | adhi | tasya | pra | iṣaḥ | dīdiyuḥ | tam | imāḥ | ṛcaḥ | tam | agnim | vardhayāmasi

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-036/mantra-rig-01-036-012

MANTRA NUMBER:

Mantra 12 of Sukta 36 of Mandal 1 of Rig Veda
Mantra 2 of Varga 10 of Adhyaya 3 of Ashtak 1 of Rig Veda
Mantra 12 of Anuvaak 8 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कण्वो घौरः

देवता (Devataa) :- अग्निः

छन्द: (Chhand) :- भुरिगनुष्टुप्

स्वर: (Swar) :- गान्धारः

THE MANTRA

The Mantra with meters (Sanskrit)

रा॒यस्पू॑र्धि स्वधा॒वोऽस्ति॒ हि तेऽग्ने॑ दे॒वेष्वाप्य॑म् । त्वं वाज॑स्य॒ श्रुत्य॑स्य राजसि॒ स नो॑ मृळ म॒हाँ अ॑सि ॥

The Mantra without meters (Sanskrit)

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् । त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥

The Mantra's transliteration in English

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त आ॑दित्या॒ आ ग॑ता स॒र्वता॑तये भू॒त दे॑वा वृत्र॒तूर्ये॑षु श॒म्भुवः॑ । रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

The Mantra without meters (Sanskrit)

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शम्भुवः । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra's transliteration in English

ta ādityā ā gatā sarvatātaye bhūta devā vṛtratūryeṣu śambhuvaḥ | rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

The Pada Paath (Sanskrit)

ते । आ॒दि॒त्याः॒ । आ । ग॒त॒ । स॒र्वऽता॑तये । भू॒त । दे॒वाः॒ । वृ॒त्र॒ऽतू॒र्ये॑षु । श॒म्ऽभुवः॑ । रथ॑म् । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒नवः॒ । विश्व॑स्मात् । नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥

The Pada Paath - transliteration

te | ādityāḥ | ā | gata | sarva-tātaye | bhūta | devāḥ | vṛtra-tūryeṣu | śam-bhuvaḥ | ratham | na | duḥ-gāt | vasavaḥ | su-dānavaḥ | viśvasmāt | naḥ | aṃhasaḥ | niḥ | pipatarna

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-106/mantra-rig-01-106-003

MANTRA NUMBER:

Mantra 3 of Sukta 106 of Mandal 1 of Rig Veda
Mantra 3 of Varga 24 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 3 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अव॑न्तु नः पि॒तरः॑ सुप्रवाच॒ना उ॒त दे॒वी दे॒वपु॑त्रे ऋता॒वृधा॑ । रथं॒ न दु॒र्गाद्व॑सवः सु॒दानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

The Mantra without meters (Sanskrit)

अवन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra's transliteration in English

avantu naḥ pitaraḥ supravācanā uta devī devaputre ṛtāvṛdhā | rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

The Pada Paath (Sanskrit)

अव॑न्तु । नः॒ । पि॒तरः॑ । सु॒ऽप्र॒वा॒च॒नाः । उ॒त । दे॒वी इति॑ । दे॒वपु॑त्रे॒ इति॑ दे॒वऽपु॑त्रे । ऋ॒त॒ऽवृधा॑ । रथ॑म् । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒न॒वः॒ । विश्व॑स्मात् । नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥

The Pada Paath - transliteration

avantu | naḥ | pitaraḥ | su-pravācanāḥ | uta | devī iti | devaputreitideva-putre | ṛta-vṛdhā | ratham | na | duḥ-gāt | vasavaḥ | su-dānavaḥ | viśvasmāt | naḥ | aṃhasaḥ | niḥ | pipartana

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-106/mantra-rig-01-106-004

MANTRA NUMBER:

Mantra 4 of Sukta 106 of Mandal 1 of Rig Veda
Mantra 4 of Varga 24 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 4 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra without meters (Sanskrit)

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra's transliteration in English

narāśaṁsaṁ vājinaṁ vājayann iha kṣayadvīram pūṣaṇaṁ sumnair īmahe | rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

The Pada Paath (Sanskrit)

नराशंसम् । वाजिनम् । वाजयन् । इह । क्षयत्ऽवीरम् । पूषणम् । सुम्नैः । ईमहे । रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥

The Pada Paath - transliteration

narāśaṃsam | vājinam | vājayan | iha | kṣayat-vīram | pūṣaṇam | sumnaiḥ | īmahe | ratham | na | duḥ-gāt | vasavaḥ | su-dānavaḥ | viśvasmāt | naḥ | aṃhasaḥ | niḥ | pipartana

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-106/mantra-rig-01-106-005

MANTRA NUMBER:

Mantra 5 of Sukta 106 of Mandal 1 of Rig Veda
Mantra 5 of Varga 24 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 5 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

बृह॑स्पते॒ सद॒मिन्नः॑ सु॒गं कृ॑धि॒ शं योर्यत्ते॒ मनु॑र्हितं॒ तदी॑महे । रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

The Mantra without meters (Sanskrit)

बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra's transliteration in English

bṛhaspate sadam in naḥ sugaṁ kṛdhi śaṁ yor yat te manurhitaṁ tad īmahe | rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

The Pada Paath (Sanskrit)

बृह॑स्पते । सद॑म् । इत् । नः॒ । सु॒ऽगम् । कृ॒धि॒ । शम् । योः । यत् । ते॒ । मनुः॑ऽहितम् । तत् । ई॒म॒हे॒ । रथ॑म् । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒नवः॒ । विश्व॑स्मात् । नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥

The Pada Paath - transliteration

bṛhaspate | sadam | it | naḥ | su-gam | kṛdhi | śam | yoḥ | yat | te | manuḥ-hitam | tat | īmahe | ratham | na | duḥ-gāt | vasavaḥ | su-dānavaḥ | viśvasmāt | naḥ | aṃhasaḥ | niḥ | pipartana

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-106/mantra-rig-01-106-006

MANTRA NUMBER:

Mantra 6 of Sukta 106 of Mandal 1 of Rig Veda
Mantra 6 of Varga 24 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 6 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रं॒ कुत्सो॑ वृत्र॒हणं॒ शची॒पतिं॑ का॒टे निबा॑ळ्ह॒ ऋषि॑रह्वदू॒तये॑ । रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥

The Mantra without meters (Sanskrit)

इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये । रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥

The Mantra's transliteration in English

indraṁ kutso vṛtrahaṇaṁ śacīpatiṁ kāṭe nibāḻha ṛṣir ahvad ūtaye | rathaṁ na durgād vasavaḥ sudānavo viśvasmān no aṁhaso niṣ pipartana ||

The Pada Paath (Sanskrit)

इन्द्र॑म् । कुत्सः॑ । वृ॒त्र॒ऽहन॑म् । श॒ची॒□ऽपति॑म् । का॒टे । निऽबा॑ळ्हः । ऋषिः॑ । अ॒ह्व॒त् । ऊ॒तये॑ । रथ॑म् । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒न॒वः॒ । विश्व॑स्मात् । नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥

The Pada Paath - transliteration

indram | kutsaḥ | vṛtra-hanam | śacī-patim | kāṭe | ni-bāḷhaḥ | ṛṣiḥ | ahvat | ūtaye | ratham | na | duḥ-gāt | vasavaḥ | su-dānavaḥ | viśvasmāt | naḥ | aṃhasaḥ | niḥ | p ipartana

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-106/mantra-rig-01-106-007

MANTRA NUMBER:

Mantra 7 of Sukta 106 of Mandal 1 of Rig Veda
Mantra 7 of Varga 24 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 7 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

दे॒वैर्नो॑ दे॒व्यदि॑ति॒र्नि पा॑तु दे॒वस्त्रा॒ता त्रा॑यता॒मप्र॑युच्छन् । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥

The Mantra without meters (Sanskrit)

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

The Mantra's transliteration in English

devair no devy aditir ni pātu devas trātā trāyatām aprayucchan | tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

The Pada Paath (Sanskrit)

दे॒वैः । नः॒ । दे॒वी । अदि॑तिः । नि । पा॒तु॒ । दे॒वः । त्रा॒ता । त्रा॒य॒ता॒म् । अप्र॑ऽयुच्छन् । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिन्धुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥

The Pada Paath - transliteration

devaiḥ | naḥ | devī | aditiḥ | ni | pātu | devaḥ | trātā | trāyatām | apra-yucchan | tat | naḥ | mitraḥ | varuṇaḥ | mamahantām | aditiḥ | sindhuḥ | pṛthivī | uta | dyauḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-107/mantra-rig-01-107-001

MANTRA NUMBER:

Mantra 1 of Sukta 107 of Mandal 1 of Rig Veda
Mantra 1 of Varga 25 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 8 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

य॒ज्ञो दे॒वानां॒ प्रत्ये॑ति सु॒म्नमादि॑त्यासो॒ भव॑ता मृळ॒यन्त॑: । आ वो॒ऽर्वाची॑ सुम॒तिर्व॑वृत्याद॒ंहोश्चि॒द्या व॑रिवो॒वित्त॒रास॑त् ॥

The Mantra without meters (Sanskrit)

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः । आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥

The Mantra's transliteration in English

yajño devānām praty eti sumnam ādityāso bhavatā mṛḻayantaḥ | ā vo 'rvācī sumatir vavṛtyād aṁhoś cid yā varivovittarāsat ||

The Pada Paath (Sanskrit)

य॒ज्ञः । दे॒वाना॑म् । प्रति॑ । ए॒ति॒ । सु॒म्नम् । आदि॑त्यासः॑ । भव॑त । मृ॒ळ॒यन्तः॑ । आ । वः॒ । अ॒र्वाची॑ । सु॒ऽम॒तिः । व॒वृ॒त्या॒त् । अं॒होः । चि॒त् । या । व॒रि॒वो॒वित्ऽत॑रा । अस॑त् ॥

The Pada Paath - transliteration

yajñaḥ | devānām | prati | eti | sumnam | ādityāsaḥ | bhavata | mṛḷayantaḥ | ā | vaḥ | avārcī | su-matiḥ | vavṛtyāt | aṃhoḥ | cit | yā | varivovit-tarā | asat

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-107/mantra-rig-01-107-002

MANTRA NUMBER:

Mantra 2 of Sukta 107 of Mandal 1 of Rig Veda
Mantra 2 of Varga 25 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 9 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

उप॑ नो दे॒वा अव॒सा ग॑म॒न्त्वङ्गि॑रसां॒ साम॑भिः स्तू॒यमा॑नाः । इन्द्र॑ इन्द्रि॒यैर्म॒रुतो॑ म॒रुद्भि॑रादि॒त्यैर्नो॒ अदि॑ति॒: शर्म॑ यंसत् ॥

The Mantra without meters (Sanskrit)

उप नो देवा अवसा गमन्त्वङ्गिरसां सामभिः स्तूयमानाः । इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥

The Mantra's transliteration in English

upa no devā avasā gamantv aṅgirasāṁ sāmabhiḥ stūyamānāḥ | indra indriyair maruto marudbhir ādityair no aditiḥ śarma yaṁsat ||

The Pada Paath (Sanskrit)

उप॑ । न॒ः । दे॒वाः । अव॑सा । आ । ग॒म॒न्तु॒ । अङ्गि॑रसाम् । साम॑ऽभिः । स्तू॒यमा॑नाः । इन्द्र॑ः । इ॒न्द्रि॒यैः । म॒रुत॑ः । म॒रुत्ऽभि॑ः । आ॒दि॒त्यैः । न॒ः । अदि॑तिः । शर्म॑ । यं॒स॒त् ॥

The Pada Paath - transliteration

upa | naḥ | devāḥ | avasā | ā | gamantu | aṅgirasām | sāma-bhiḥ | stūyamānāḥ | indraḥ | indri yaiḥ | marutaḥ | marut-bhiḥ | ādityaiḥ | naḥ | aditiḥ | śarma | yaṃsat

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-107/mantra-rig-01-107-003

MANTRA NUMBER:

Mantra 3 of Sukta 107 of Mandal 1 of Rig Veda
Mantra 3 of Varga 25 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 10 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तन्न॒ इन्द्र॒स्तद्वरु॑ण॒स्तद॒ग्निस्तद॑र्य॒मा तत्स॑वि॒ता चनो॑ धात् । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः ॥

The Mantra without meters (Sanskrit)

तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

The Mantra's transliteration in English

tan na indras tad varuṇas tad agnis tad aryamā tat savitā cano dhāt | tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

The Pada Paath (Sanskrit)

तत् । नः॒ । इन्द्रः॑ । तत् । वरु॑णः । तत् । अ॒ग्निः । तत् । अ॒र्य॒मा । तत् । स॒वि॒ता । चनः॑ । धा॒त् । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिन्धुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥

The Pada Paath - transliteration

tat | naḥ | indraḥ | tat | varuṇaḥ | tat | agniḥ | tat | aryamā | tat | savitā | canaḥ | dhāt | tat | naḥ | mitraḥ | varuṇaḥ | mamahantām | aditiḥ | sindhuḥ | pṛthivī | uta | dyauḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-001

MANTRA NUMBER:

Mantra 1 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 1 of Varga 26 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 11 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

य इ॑न्द्राग्नी चि॒त्रत॑मो॒ रथो॑ वाम॒भि विश्वा॑नि॒ भुव॑नानि॒ चष्टे॑ । तेना या॑तं स॒रथं॑ तस्थि॒वांसाथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे । तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

ya indrāgnī citratamo ratho vām abhi viśvāni bhuvanāni caṣṭe | tenā yātaṁ sarathaṁ tasthivāṁsāthā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यः । इ॒न्द्रा॒ग्नी॒ इति॑ । चि॒त्रऽत॑मः । रथः॑ । वा॒म् । अ॒भि । विश्वा॑नि । भुव॑नानि । चष्टे॑ । तेन॑ । आ । या॒त॒म् । स॒ऽरथ॑म् । त॒स्थि॒वांसा॑ । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yaḥ | indrāgnī iti | citra-tamaḥ | rathaḥ | vām | abhi | viśvāni | bhuvanāni | caṣṭe | tena | ā | yātam | sa-ratham | tasthivāṃsā | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-002

MANTRA NUMBER:

Mantra 2 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 2 of Varga 26 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 12 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् । तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥

The Mantra without meters (Sanskrit)

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् । तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥

The Mantra's transliteration in English

yāvad idam bhuvanaṁ viśvam asty uruvyacā varimatā gabhīram | tāvām̐ ayam pātave somo astv aram indrāgnī manase yuvabhyām ||

The Pada Paath (Sanskrit)

यावत् । इदम् । भुवनम् । विश्वम् । अस्ति । उरुऽव्यचा । वरिमता । गभीरम् । तावान् । अयम् । पातवे । सोमः । अस्तु । अरम् । इन्द्राग्नी इति । मनसे । युवऽभ्याम् ॥

The Pada Paath - transliteration

yāvat | idam | bhuvanam | viśvam | asti | uru-vyacā | varimatā | gabhīram | tāvān | ayam | pātave | somaḥ | astu | aram | indrāgnī iti | manase | yuva-bhyām

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-003

MANTRA NUMBER:

Mantra 3 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 3 of Varga 26 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 13 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

च॒क्राथे॑ हि स॒ध्र्य१॒॑ङ्नाम॑ भ॒द्रं स॑ध्रीची॒ना वृ॑त्रहणा उ॒त स्थ॑: । तावि॑न्द्राग्नी स॒ध्र्य॑ञ्चा नि॒षद्या॒ वृष्ण॒: सोम॑स्य वृ॒षणा वृ॑षेथाम् ॥

The Mantra without meters (Sanskrit)

चक्राथे हि सध्र्यङ्नाम भद्रं सध्रीचीना वृत्रहणा उत स्थः । ताविन्द्राग्नी सध्र्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥

The Mantra's transliteration in English

cakrāthe hi sadhryaṅ nāma bhadraṁ sadhrīcīnā vṛtrahaṇā uta sthaḥ | tāv indrāgnī sadhryañcā niṣadyā vṛṣṇaḥ somasya vṛṣaṇā vṛṣethām ||

The Pada Paath (Sanskrit)

च॒क्राथे॑ । हि । स॒ध्र्य॑क् । नाम॑ । भ॒द्रम् । स॒ध्री॒ची॒ना । वृ॒त्र॒ऽह॒णौ॒ । उ॒त । स्थ॒: । तौ । इ॒न्द्रा॒ग्नी॒ इति॑ । स॒ध्र्य॑ञ्चा । नि॒ऽसद्य॑ । वृष्ण॑: । सोम॑स्य । वृ॒षणा॒ । आ । वृ॒षे॒था॒म् ॥

The Pada Paath - transliteration

cakrāthe | hi | sadhryak | nāma | bhadram | sadhrīcīnā | vṛtra-haṇau | uta | sthaḥ | tau | indrāgnī iti | sadhryañcā | ni-sadya | vṛṣṇaḥ | somasya | vṛṣaṇā | ā | vṛṣethām

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-004

MANTRA NUMBER:

Mantra 4 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 4 of Varga 26 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 14 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- भुरिक्पङ्क्ति

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा । तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥

The Mantra without meters (Sanskrit)

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा । तीव्रैः सोमैः परिषिक्तेभिरर्वागेन्द्राग्नी सौमनसाय यातम् ॥

The Mantra's transliteration in English

samiddheṣv agniṣv ānajānā yatasrucā barhir u tistirāṇā | tīvraiḥ somaiḥ pariṣiktebhir arvāg endrāgnī saumanasāya yātam ||

The Pada Paath (Sanskrit)

सम्ऽइद्धेषु । अग्निषु । आनजाना । यतऽस्रुचा । बर्हिः । ऊँ इति । तिस्तिराणा । तीव्रैः । सोमैः । परिऽसिक्तेभिः । अर्वाक् । आ । इन्द्राग्नी इति । सौमनसाय । यातम् ॥

The Pada Paath - transliteration

sam-iddheṣu | agniṣu | ānajānā | yata-srucā | barhiḥ | oṃ iti | tistirāṇā | tīvraiḥ | somaiḥ | pari-siktebhiḥ | arvāk | ā | indrāgnī iti | saumanasāya | yātam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-005

MANTRA NUMBER:

Mantra 5 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 5 of Varga 26 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 15 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- पङ्क्तिः

स्वर: (Swar) :- पञ्चमः

THE MANTRA

The Mantra with meters (Sanskrit)

यानी॑न्द्राग्नी च॒क्रथु॑र्वी॒र्या॑णि॒ यानि॑ रू॒पाण्यु॒त वृष्ण्या॑नि । या वां॑ प्र॒त्नानि॑ स॒ख्या शि॒वानि॒ तेभि॒: सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि । या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yānīndrāgnī cakrathur vīryāṇi yāni rūpāṇy uta vṛṣṇyāni | yā vām pratnāni sakhyā śivāni tebhiḥ somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यानि॑ । इ॒न्द्रा॒ग्नी॒ इति॑ । च॒क्रथुः॑ । वी॒र्या॑णि । यानि॑ । रू॒पाणि॑ । उ॒त । वृष्ण्या॑नि । या । वा॒म् । प्र॒त्नानि॑ । स॒ख्या । शि॒वानि॑ । तेभिः॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yāni | indrāgnī iti | cakrathuḥ | vīryāṇi | yāni | rūpāṇi | uta | vṛṣṇyāni | yā | vām | pratnāni | sakhyā | śivāni | tebhiḥ | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-006

MANTRA NUMBER:
Mantra 6 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 1 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 16 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदब्र॑वं प्रथ॒मं वां॑ वृणा॒नो॒३॒॑ऽयं सोमो॒ असु॑रैर्नो वि॒हव्यः॑ । तां स॒त्यां श्र॒द्धाम॒भ्या हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यदब्रवं प्रथमं वां वृणानोऽयं सोमो असुरैर्नो विहव्यः । तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad abravam prathamaṁ vāṁ vṛṇāno 'yaṁ somo asurair no vihavyaḥ | tāṁ satyāṁ śraddhām abhy ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । अब्र॑वम् । प्र॒थ॒मम् । वा॒म् । वृ॒णा॒नः॑ । अ॒यम् । सोमः॑ । असु॑रैः । नः॒ । वि॒ऽहव्यः॑ । ताम् । स॒त्याम् । श्र॒द्धाम् । अ॒भि । आ । हि । या॒तम् । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yat | abravam | prathamam | vām | vṛṇānaḥ | ayam | somaḥ | asuraiḥ | naḥ | vi-havyaḥ | tām | satyām | śraddhām | abhi | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-007

MANTRA NUMBER:

Mantra 7 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 2 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 17 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī madathaḥ sve duroṇe yad brahmaṇi rājani vā yajatrā | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । इन्द्राग्नी इति । मदथः । स्वे । दुरोणे । यत् । ब्रह्मणि । राजनि । वा । यजत्रा । अतः । परि । वृषणौ । आ । हि । यातम् । अथ । सोमस्य । पिबतम् । सुतस्य ॥

The Pada Paath - transliteration

yat | indrāgnī iti | madathaḥ | sve | duroṇe | yat | brahmaṇi | rājani | vā | yajatrā | ataḥ | pari | vṛṣaṇau | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-008

MANTRA NUMBER:

Mantra 8 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 3 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 18 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदि॑न्द्राग्नी॒ यदु॑षु तु॒र्वशे॑षु यद्द्रु॒ह्युष्वनु॑षु पू॒रुषु॑ स्थः । अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī yaduṣu turvaśeṣu yad druhyuṣv anuṣu pūruṣu sthaḥ | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । इ॒न्द्रा॒ग्नी॒ इति॑ । यदु॑षु । तु॒र्वशे॑षु । यत् । द्रु॒ह्युषु॑ । अनु॑षु । पू॒रुषु॑ । स्थः । अतः॑ । परि॑ । वृ॒ष॒णौ॒ । आ । हि । या॒तम् । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yat | indrāgnī iti | yaduṣu | turvaśeṣu | yat | druhyuṣu | anuṣu | pūruṣu | sthaḥ | ataḥ | pari | vṛṣaṇau | ā | h i | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-009

MANTRA NUMBER:

Mantra 9 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 4 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 19 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदि॑न्द्राग्नी अ॒वमस्यां॑ पृथि॒व्यां म॑ध्य॒मस्यां॑ पर॒मस्यां॑मु॒त स्थः। अत॒: परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः। अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī avamasyām pṛthivyām madhyamasyām paramasyām uta sthaḥ | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत्। इ॒न्द्रा॒ग्नी॒ इति॑। अ॒व॒मस्या॑म्। पृ॒थि॒व्याम्। म॒ध्य॒मस्या॑म्। प॒र॒मस्या॑म्। उ॒त। स्थः। अत॑:। परि॑। वृ॒ष॒णौ॒। आ। हि। या॒तम्। अथ॑। सोम॑स्य। पि॒ब॒त॒म्। सु॒तस्य॑ ॥

The Pada Paath - transliteration

yat | indrāgnī iti | avamasyām | pṛthivyām | madhyamasyām | paramasyām | uta | sthaḥ | ataḥ | pari | vṛṣaṇau | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-010

MANTRA NUMBER:

Mantra 10 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 5 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 20 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदि॑न्द्राग्नी प॒रम॒स्यां॑ पृथि॒व्यां म॑ध्य॒मस्यां॑मव॒मस्यां॑मु॒त स्थः । अ॒तः परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī paramasyām pṛthivyām madhyamasyām avamasyām uta sthaḥ | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । इ॒न्द्रा॒ग्नी॒ इति॑ । प॒रमस्या॑म् । पृ॒थि॒व्याम् । म॒ध्य॒मस्या॑म् । अ॒व॒मस्या॑म् । उ॒त । स्थः । अतः॑ । परि॑ । वृ॒ष॒णौ॒ । आ । हि । या॒तम् । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yat | indrāgnī iti | paramasyām | pṛthivyām | madhyamasyām | avamasyām | uta | sthaḥ | ataḥ | pari | vṛṣaṇau | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-011

MANTRA NUMBER:

Mantra 11 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 6 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 21 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदि॑न्द्राग्नी दि॒वि ष्ठो यत्पृ॑थि॒व्यां यत्पर्व॑ते॒ष्वोष॑धीष्व॒प्सु । अ॒तः परि॑ वृषणा॒वा हि या॒तमथा॒ सोम॑स्य पिबतं सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī divi ṣṭho yat pṛthivyāṁ yat parvateṣv oṣadhīṣv apsu | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । इ॒न्द्रा॒ग्नी॒ इति॑ । दि॒वि । स्थः । यत् । पृ॒थि॒व्याम् । यत् । पर्व॑तेषु । ओष॑धीषु । अ॒प्ऽसु । अतः॑ । परि॑ । वृ॒ष॒णौ॒ । आ । हि । या॒तम् । अथ॑ । सोम॑स्य । पि॒ब॒त॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yat | indrāgnī iti | divi | sthaḥ | yat | pṛthivyām | yat | parvateṣu | oṣadhīṣu | ap-su | ataḥ | pari | vṛṣaṇau | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-012

MANTRA NUMBER:

Mantra 12 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 7 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 22 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra without meters (Sanskrit)

यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे । अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥

The Mantra's transliteration in English

yad indrāgnī uditā sūryasya madhye divaḥ svadhayā mādayethe | ataḥ pari vṛṣaṇāv ā hi yātam athā somasya pibataṁ sutasya ||

The Pada Paath (Sanskrit)

यत् । इन्द्राग्नी इति । उत्ऽइता । सूर्यस्य । मध्ये । दिवः । स्वधया । मादयेथे इति । अतः । परि । वृषणौ । आ । हि । यातम् । अथ । सोमस्य । पिबतम् । सुतस्य ॥

The Pada Paath - transliteration

yat | indrāgnī iti | ut-itā | sūryasya | madhye | divaḥ | svadhayā | mādayetheiti | ataḥ | pari | vṛṣaṇau | ā | hi | yātam | atha | somasya | pibatam | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-108/mantra-rig-01-108-013

MANTRA NUMBER:

Mantra 13 of Sukta 108 of Mandal 1 of Rig Veda
Mantra 8 of Varga 27 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 23 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्दः (Chhand) :- त्रिष्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

एवेन्द्रा॑ग्नी पपि॒वांसा॑ सु॒तस्य॒ विश्वा॒स्मभ्यं॒ सं जं॑यतं॒ धना॑नि । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धु॑ः पृ॒थि॒वी उ॒त द्यौः ॥

The Mantra without meters (Sanskrit)

एवेन्द्राग्नी पपिवांसा सुतस्य विश्वास्मभ्यं सं जयतं धनानि । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

The Mantra's transliteration in English

evendrāgnī papivāṁsā sutasya viśvāsmabhyaṁ saṁ jayataṁ dhanāni | tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

The Pada Paath (Sanskrit)

ए॒व । इ॒न्द्रा॒ग्नी॒ इति॑ । प॒पि॒ऽवांसा॑ । सु॒तस्य॑ । विश्वा॑ । अ॒स्मभ्य॑म् । सम् । ज॒य॒त॒म् । धना॑नि । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिन्धु॑ः । पृ॒थि॒वी । उ॒त । द्यौः ॥

The Pada Paath - transliteration

eva | indrāgnī iti | papi-vāṃsā | sutasya | viśvā | asmabhyam | sam | jayatam | dhanāni | tat | naḥ | mi traḥ | varuṇaḥ | mamahantām | aditiḥ | sindhuḥ | pṛthivī | uta | dyauḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-001

MANTRA NUMBER:

Mantra 1 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 1 of Varga 28 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 24 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वि ह्यख्यं॒ मन॑सा॒ वस्य॑ इ॒च्छन्निन्द्रा॑ग्नी ज्ञा॒स उ॒त वा॑ सजा॒तान्। नान्या यु॒वत्प्रम॑तिरस्ति॒ मह्यं॒ स वां॒ धियं॑ वाज॒यन्ती॑मतक्षम् ॥

The Mantra without meters (Sanskrit)

वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान् । नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥

The Mantra's transliteration in English

vi hy akhyam manasā vasya icchann indrāgnī jñāsa uta vā sajātān | nānyā yuvat pramatir asti mahyaṁ sa vāṁ dhiyaṁ vājayantīm atakṣam ||

The Pada Paath (Sanskrit)

वि । हि । अख्य॑म् । मन॑सा । वस्यः॑ । इ॒च्छन् । इन्द्रा॑ग्नी॒ इति॑ । ज्ञा॒सः । उ॒त । वा॒ । स॒ऽजा॒तान् । न । अ॒न्या । यु॒वत् । प्रऽम॑तिः । अ॒स्ति॒ । मह्य॑म् । सः । वा॒म् । धिय॑म् । वा॒ज॒ऽयन्ती॑म् । अ॒त॒क्ष॒म् ॥

The Pada Paath - transliteration

vi | hi | akhyam | manasā | vasyaḥ | icchan | indrāgnī iti | jñāsaḥ | uta | vā | sa-jātān | na | anyā | yuvat | pra-matiḥ | asti | mahyam | saḥ | vām | dhiyam | vāja-yantīm | atakṣam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-002

MANTRA NUMBER:

Mantra 2 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 2 of Varga 28 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 25 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अश्र॑वं॒ हि भू॑रि॒दाव॑त्तरा वां॒ विजा॑मातुरु॒त वा॑ घा स्या॒लात्। अथा॒ सोम॑स्य॒ प्रय॑ती यु॒वभ्या॒मिन्द्रा॑ग्नी॒ स्तोमं॑ जनयामि॒ नव्य॑म्॥

The Mantra without meters (Sanskrit)

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात्। अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम्॥

The Mantra's transliteration in English

aśravaṁ hi bhūridāvattarā vāṁ vijāmātur uta vā ghā syālāt | athā somasya prayatī yuvabhyām indrāgnī stomaṁ janayāmi navyam ||

The Pada Paath (Sanskrit)

अश्र॑वम्। हि। भू॒रि॒दाव॑त्ऽतरा। वा॒म्। विऽजा॑मातुः। उ॒त। वा॒। घ॒। स्या॒लात्। अथ॑। सोम॑स्य। प्रऽय॑ती। यु॒वऽभ्या॑म्। इन्द्रा॑ग्नी॒ इति॑। स्तोम॑म्। ज॒न॒या॒मि॒। नव्य॑म्॥

The Pada Paath - transliteration

aśravam | hi | bhūridāvat-tarā | vām | vi-jāmātuḥ | uta | vā | gha | syālāt | atha | somasya | pra-yatī | yuva-bhyām | indrāgnī iti | stomam | janayāmi | navyam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-003

MANTRA NUMBER:

Mantra 3 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 3 of Varga 28 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 26 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मा च्छे॑द्म र॒श्मीँरिति॒ नाध॑मानाः पितॄ॒णां श॒क्तीर॑नु॒यच्छ॑मानाः । इ॒न्द्रा॒ग्निभ्यां॒ कं वृष॑णो मदन्ति॒ ता ह्यद्री॑ धि॒षणा॑या उ॒पस्थे॑ ॥

The Mantra without meters (Sanskrit)

मा च्छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः । इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥

The Mantra's transliteration in English

mā cchedma raśmīm̐r iti nādhamānāḥ pitṝṇāṁ śaktīr anuyacchamānāḥ | indrāgnibhyāṁ kaṁ vṛṣaṇo madanti tā hy adrī dhiṣaṇāyā upasthe ||

The Pada Paath (Sanskrit)

मा । छे॒द्म॒ । र॒श्मीन् । इति॑ । नाध॑मानाः । पि॒तॄ॒णाम् । श॒क्तीः । अ॒नु॒ऽयच्छ॑मानाः । इ॒न्द्रा॒ग्निऽभ्या॑म् । कम् । वृष॑णः । म॒द॒न्ति॒ । ता । हि । अद्री॒ इति॑ । धि॒षणा॑याः । उ॒पऽस्थे॑ ॥

The Pada Paath - transliteration

mā | chedma | raśmīn | iti | nādhamānāḥ | pitṝṇām | śaktīḥ | anu-yacchamānāḥ | indrāgni-bhyām | kam | vṛṣaṇaḥ | madanti | tā | hi | adrī iti | dhiṣaṇāyāḥ | upa-sthe

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-004

MANTRA NUMBER:

Mantra 4 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 4 of Varga 28 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 27 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यु॒वाभ्यां॑ दे॒वी धि॒षणा॒ मदा॒येन्द्रा॑ग्नी॒ सोम॑मुश॒ती सु॑नोति । ताव॑श्विना भद्रहस्ता सुपाणी॒ आ धा॑वतं॒ मधु॑ना पृ॒ङ्क्तम॒प्सु ॥

The Mantra without meters (Sanskrit)

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति । तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥

The Mantra's transliteration in English

yuvābhyāṁ devī dhiṣaṇā madāyendrāgnī somam uśatī sunoti | tāv aśvinā bhadrahastā supāṇī ā dhāvatam madhunā pṛṅktam apsu ||

The Pada Paath (Sanskrit)

यु॒वाभ्या॑म् । दे॒वी । धि॒षणा॑ । मदा॑य । इन्द्रा॑ग्नी॒ इति॑ । सोम॑म् । उ॒श॒ती । सु॒नो॒ति॒ । तौ । अ॒श्वि॒ना॒ । भ॒द्र॒ऽह॒स्ता॒ । सु॒पा॒णी॒ इति॑ सु॒ऽपाणी । आ । धा॒व॒त॒म् । मधु॑ना । पृ॒ङ्क्तम् । अ॒प्ऽसु ॥

The Pada Paath - transliteration

yuvābhyām | devī | dhiṣaṇā | madāya | indrāgnī iti | somam | uśatī | sunoti | tau | aśvinā | bhadra-hastā | supāṇī itisu-pāṇī | ā | dhāvatam | madhunā | pṛṅktam | ap-su

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-005

MANTRA NUMBER:

Mantra 5 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 5 of Varga 28 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 28 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यु॒वामि॑न्द्राग्नी॒ वसु॑नो विभा॒गे त॒वस्त॑मा शुश्रव वृ॒त्रह॑त्ये । ताव॒सद्या॑ ब॒र्हिषि॑ य॒ज्ञे अ॒स्मिन्प्र च॑र्षणी मादयेथां सु॒तस्य॑ ॥

The Mantra without meters (Sanskrit)

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये । तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥

The Mantra's transliteration in English

yuvām indrāgnī vasuno vibhāge tavastamā śuśrava vṛtrahatye | tāv āsadyā barhiṣi yajñe asmin pra carṣaṇī mādayethāṁ sutasya ||

The Pada Paath (Sanskrit)

यु॒वाम् । इ॒न्द्रा॒ग्नी॒ इति॑ । वसु॑नः । वि॒ऽभा॒गे । त॒वःऽत॑मा । शु॒श्र॒व॒ । वृ॒त्र॒ऽहत्ये॑ । तौ । आ॒ऽसद्य॑ । ब॒र्हिषि॑ । य॒ज्ञे । अ॒स्मिन् । प्र । च॒र्ष॒णी॒ इति॑ । मा॒द॒ये॒था॒म् । सु॒तस्य॑ ॥

The Pada Paath - transliteration

yuvām | indrāgnī iti | vasunaḥ | vi-bhāge | tavaḥ-tamā | śuśrava | vṛtra-hatye | tau | āsadya | barhiṣi | yajñe | asmin | pra | carṣaṇī iti | mādayethām | sutasya

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-006

MANTRA NUMBER:

Mantra 6 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 1 of Varga 29 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 29 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र च॑र्ष॒णिभ्य॑: पृतना॒हवे॑षु॒ प्र पृ॑थि॒व्या रि॑रिचाथे दि॒वश्च॑ । प्र सिन्धु॑भ्य॒: प्र गि॒रिभ्यो॑ महि॒त्वा प्रेन्द्रा॑ग्नी॒ विश्वा॒ भुव॒नात्य॒न्या ॥

The Mantra without meters (Sanskrit)

प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥

The Mantra's transliteration in English

pra carṣaṇibhyaḥ pṛtanāhaveṣu pra pṛthivyā riricāthe divaś ca | pra sindhubhyaḥ pra giribhyo mahitvā prendrāgnī viśvā bhuvanāty anyā ||

The Pada Paath (Sanskrit)

प्र । च॒र्ष॒णिऽभ्यः॑ । पृ॒त॒ना॒ऽह॒वे॑षु । प्र । पृ॒थि॒व्याः । रि॒रि॒चा॒थे॒ इति॑ । दि॒वः । च॒ । प्र । सिन्धु॑ऽभ्यः । प्र । गि॒रिऽभ्यः॑ । म॒हि॒ऽत्वा । प्र । इ॒न्द्रा॒ग्नी॒ इति॑ । विश्वा॑ । भुव॑ना । अति॑ । अ॒न्या ॥

The Pada Paath - transliteration

pra | carṣaṇi-bhyaḥ | pṛtanāhaveṣu | pra | pṛthivyāḥ | riricātheiti | divaḥ | ca | pra | sindhu-bhyaḥ | pra | giri-bhyaḥ | mahi-tvā | pra | indrāgnī iti | viśvā | bhuvanā | ati | anyā

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-007

MANTRA NUMBER:

Mantra 7 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 2 of Varga 29 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 30 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

आ भ॑रतं॒ शिक्ष॑तं वज्रबाहू अ॒स्माँ इ॑न्द्राग्नी अवतं॒ शची॑भिः । इ॒मे नु ते र॒श्मय॒: सूर्य॑स्य॒ येभि॑: सपि॒त्वं पि॒तरो॑ न॒ आस॑न् ॥

The Mantra without meters (Sanskrit)

आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः । इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥

The Mantra's transliteration in English

ā bharataṁ śikṣataṁ vajrabāhū asmām̐ indrāgnī avataṁ śacībhiḥ | ime nu te raśmayaḥ sūryasya yebhiḥ sapitvam pitaro na āsan ||

The Pada Paath (Sanskrit)

आ । भ॒र॒त॒म् । शिक्ष॑तम् । व॒ज्र॒बा॒हू॒ इति॑ वज्रऽबाहू । अ॒स्मान् । इ॒न्द्रा॒ग्नी॒ । अ॒व॒त॒म् । शची॑भिः । इ॒मे । नु । ते । र॒श्मय॑: । सूर्य॑स्य । येभि॑: । स॒ऽपि॒त्वम् । पि॒तर॑: । न॒: । आस॑न् ॥

The Pada Paath - transliteration

ā | bharatam | śikṣatam | vajrabāhū itivajra-bāhū | asmān | indrāgnī | avatam | śacībhiḥ | ime | nu | te | raśmayaḥ | sūryasya | yebhiḥ | sa-pitvam | pitaraḥ | naḥ | āsan

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-109/mantra-rig-01-109-008

MANTRA NUMBER:

Mantra 8 of Sukta 109 of Mandal 1 of Rig Veda
Mantra 3 of Varga 29 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 31 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- इन्द्राग्नी

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

पु॒रं॒द॒रा शिक्ष॑तं वज्रहस्ता॒स्माँ इ॑न्द्राग्नी अवतं॒ भरे॑षु । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒: सिन्धु॑: पृथि॒वी उ॒त द्यौः ॥

The Mantra without meters (Sanskrit)

पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

The Mantra's transliteration in English

puraṁdarā śikṣataṁ vajrahastāsmām̐ indrāgnī avatam bhareṣu | tan no mitro varuṇo māmahantām aditiḥ sindhuḥ pṛthivī uta dyauḥ ||

The Pada Paath (Sanskrit)

पु॒र॑म्ऽद॒रा॑ । शिक्ष॑तम् । व॒ज्र॒ऽह॒स्ता॒ । अ॒स्मान् । इ॒न्द्रा॒ग्नी॒ इति॑ । अ॒व॒त॒म् । भरे॑षु । तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिन्धु॑ः । पृ॒थि॒वी । उ॒त । द्यौः ॥

The Pada Paath - transliteration

puram-darā | śikṣatam | vajra-hastā | asmān | indrāgnī iti | avatam | bhareṣu | tat | naḥ | mitraḥ | varuṇaḥ | mamahantām | aditiḥ | sindhuḥ | pṛth ivī | uta | dyauḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-001

MANTRA NUMBER:

Mantra 1 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 1 of Varga 30 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 32 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त॒तं मे॒ अप॒स्तदु॑ तायते॒ पुन॒: स्वादि॑ष्ठा धी॒तिरु॒चथा॑य शस्यते । अ॒यं स॑मु॒द्र इ॒ह वि॒श्वदे॑व्य॒: स्वाहा॑कृतस्य॒ सम॑ु तृप्णुत ऋभवः ॥

The Mantra without meters (Sanskrit)

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते । अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥

The Mantra's transliteration in English

tatam me apas tad u tāyate punaḥ svādiṣṭhā dhītir ucathāya śasyate | ayaṁ samudra iha viśvadevyaḥ svāhākṛtasya sam u tṛpṇuta ṛbhavaḥ ||

The Pada Paath (Sanskrit)

त॒तम् । मे॒ । अप॑: । तत् । ऊँ॒ इति॑ । ता॒य॒ते॒ । पुन॒रिति॑ । स्वादि॑ष्ठा । धी॒तिः । उ॒चथा॑य । श॒स्य॒ते॒ । अ॒यम् । स॒मु॒द्रः । इ॒ह । वि॒श्वऽदे॑व्यः॒ । स्वाहा॑ऽकृतस्य । सम् । ऊँ॒ इति॑ । तृ॒प्णु॒त॒ । ऋ॒भ॒वः॒ ॥

The Pada Paath - transliteration

tatam | me | apaḥ | tat | oṃ iti | tāyate | punariti | svādiṣṭhā | dhītiḥ | ucathāya | śasyate | ayam | samudraḥ | iha | v iśva-devyaḥ | svāhākṛtasya | sam | oṃ iti | tṛpṇuta | ṛbhavaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-002

MANTRA NUMBER:

Mantra 2 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 2 of Varga 30 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 33 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ॒भो॒गयं॒ प्र यदि॒च्छन्त॒ ऐत॒नापा॑का॒: प्राञ्चो॒ मम॒ के चि॑दा॒पय॑: । सौध॑न्वनासश्चरि॒तस्य॑ भू॒मनाग॑च्छत सवि॒तुर्दा॒शुषो॑ गृ॒हम् ॥

The Mantra without meters (Sanskrit)

आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः । सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम् ॥

The Mantra's transliteration in English

ābhogayam pra yad icchanta aitanāpākāḥ prāñco mama ke cid āpayaḥ | saudhanvanāsaś caritasya bhūmanāgacchata savitur dāśuṣo gṛham ||

The Pada Paath (Sanskrit)

आ॒ऽभो॒गय॑म् । प्र । यत् । इ॒च्छन्त॑: । ऐत॑न । अपा॑काः । प्राञ्च॑: । मम॑ । के । चि॒त् । आ॒पय॑: । सौध॑न्वनासः । च॒रि॒तस्य॑ । भू॒मना॑ । अग॑च्छत । स॒वि॒तुः । दा॒शुष॑: । गृ॒हम् ॥

The Pada Paath - transliteration

ābhogayam | pra | yat | icchantaḥ | aitana | apākāḥ | prāñcaḥ | mama | ke | cit | āpayaḥ | saudhanvanāsaḥ | caritasya | bhūmanā | agacchata | savituḥ | dāśuṣaḥ | gṛham

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-003

MANTRA NUMBER:

Mantra 3 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 3 of Varga 30 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 34 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तत्स॑वि॒ता वो॑ऽमृत॒त्वमासु॑व॒दगो॑ह्यं॒ यच्छ्र॒वय॑न्त॒ ऐत॑न । त्यं चि॑च्चम॒सम॑सु॒रस्य॒ भक्ष॑ण॒मेकं॒ सन्त॑मकृणुता॒ चतु॑र्वयम् ॥

The Mantra without meters (Sanskrit)

तत्सविता वोऽमृतत्वमासुवदगोह्यं यच्छ्रवयन्त ऐतन । त्यं चिच्चमसमसुरस्य भक्षणमेकं सन्तमकृणुता चतुर्वयम् ॥

The Mantra's transliteration in English

tat savitā vo 'mṛtatvam āsuvad agohyaṁ yac chravayanta aitana | tyaṁ cic camasam asurasya bhakṣaṇam ekaṁ santam akṛṇutā caturvayam ||

The Pada Paath (Sanskrit)

तत् । स॒वि॒ता । वः॒ । अ॒मृ॒त॒ऽत्वम् । आ । अ॒सु॒व॒त् । अगो॑ह्यम् । यत् । श्र॒वय॑न्तः । ऐत॑न । त्यम् । चि॒त् । च॒म॒सम् । असु॑रस्य । भक्ष॑णम् । एक॑म् । सन्त॑म् । अ॒कृ॒णु॒त॒ । चतुः॑ऽवयम् ॥

The Pada Paath - transliteration

tat | savitā | vaḥ | amṛta-tvam | ā | asuvat | agohyam | yat | śravayantaḥ | aitana | tyam | cit | camasam | asurasya | bhakṣaṇam | ekam | santam | akṛṇuta | catuḥ-vayam

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-004

MANTRA NUMBER:

Mantra 4 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 4 of Varga 30 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 35 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒ष्ट्वी शमी॑ तरणि॒त्वेन॑ वा॒घतो॒ मर्ता॑सः॒ सन्तो॑ अमृ॒त॒त्वमा॑नशुः । सौ॒ध॒न्व॒ना ऋ॒भवः॒ सूर॑चक्षसः संवत्स॒रे समपृ॑च्यन्त धी॒तिभि॑ः ॥

The Mantra without meters (Sanskrit)

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो अमृतत्वमानशुः । सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः ॥

The Mantra's transliteration in English

viṣṭvī śamī taraṇitvena vāghato martāsaḥ santo amṛtatvam ānaśuḥ | saudhanvanā ṛbhavaḥ sūracakṣasaḥ saṁvatsare sam apṛcyanta dhītibhiḥ ||

The Pada Paath (Sanskrit)

वि॒ष्ट्वी । शमी॑ । त॒र॒णि॒ऽत्वेन॑ । वा॒घतः॑ । मर्ता॑सः । सन्तः॑ । अ॒मृ॒त॒ऽत्वम् । आ॒न॒शुः॒ । सौ॒ध॒न्व॒नाः । ऋ॒भवः॑ । सूर॑ऽचक्षसः । स॒वँ॒म्व॒त्स॒रे । सम् । अ॒पृ॒च्य॒न्त॒ । धी॒तिऽभिः॑ ॥

The Pada Paath - transliteration

viṣṭavī | śamī | taraṇi-tvena | vāghataḥ | martāsaḥ | santaḥ | amṛta-tvam | ānaśuḥ | saudhanvanāḥ | ṛbhavaḥ | sūra-cakṣasaḥ | saṃvatsare | sam | apṛcyanta | dhīti-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-005

MANTRA NUMBER:

Mantra 5 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 5 of Varga 30 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 36 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

क्षेत्र॑मिव॒ वि म॑मु॒स्तेज॑नेन॒ँ एकं॒ पात्र॑मृ॒भवो॒ जेह॑मानम् । उप॑स्तुता उप॒मं नाध॑माना॒ अम॑र्त्येषु॒ श्रव॑ इ॒च्छमा॑नाः ॥

The Mantra without meters (Sanskrit)

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानम् । उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥

The Mantra's transliteration in English

kṣetram iva vi mamus tejanenam̐ ekam pātram ṛbhavo jehamānam | upastutā upamaṁ nādhamānā amartyeṣu śrava icchamānāḥ ||

The Pada Paath (Sanskrit)

क्षेत्र॑म्ऽइव । वि । म॒मु॒ः । तेज॑नेनम् । एक॑म् । पात्र॑म् । ऋ॒भव॑ः । जेह॑मानम् । उप॑ऽस्तुताः । उ॒प॒ऽमम् । नाध॑मानाः । अम॑र्त्येषु । श्रव॑ः । इ॒च्छमा॑नाः ॥

The Pada Paath - transliteration

kṣetram-iva | vi | mamuḥ | tejanenam | ekam | pātram | ṛbhavaḥ | jehamānam | upa-stutāḥ | upa-mam | nādhamānāḥ | amartyeṣu | śravaḥ | icchamānāḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-006

MANTRA NUMBER:

Mantra 6 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 1 of Varga 31 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 37 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ म॑नी॒षाम॒न्तरि॑क्षस्य॒ नृभ्य॑: स्रु॒चेव॑ घृ॒तं जु॑हवाम वि॒द्मना॑ । त॒र॒णि॒त्वा ये पि॒तुर॑स्य सश्चि॒र ऋ॒भवो॒ वाज॑मरुहन्दि॒वो रज॑: ॥

The Mantra without meters (Sanskrit)

आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना । तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥

The Mantra's transliteration in English

ā manīṣām antarikṣasya nṛbhyaḥ sruceva ghṛtaṁ juhavāma vidmanā | taraṇitvā ye pitur asya saścira ṛbhavo vājam aruhan divo rajaḥ ||

The Pada Paath (Sanskrit)

आ । म॒नी॒षाम् । अ॒न्तरि॑क्षस्य । नृऽभ्यः॑ । स्रु॒चाऽइ॑व । घृ॒तम् । जु॒ह॒वा॒म॒ । वि॒द्मना॑ । त॒र॒णि॒ऽत्वा । ये । पि॒तुः । अ॒स्य॒ । स॒श्चि॒रे । ऋ॒भवः॑ । वाज॑म् । अ॒रु॒ह॒न् । दि॒वः । रजः॑ ॥

The Pada Paath - transliteration

ā | mānīṣām | antarikṣasya | nṛ-bhyaḥ | srucāiva | ghṛtam | juhavāma | vidmanā | taraṇi-tvā | ye | pituḥ | asya | saścire | ṛbhavaḥ | vājam | aruhan | divaḥ | rajaḥ

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-007

MANTRA NUMBER:

Mantra 7 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 2 of Varga 31 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 38 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः । युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥

The Mantra without meters (Sanskrit)

ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः । युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥

The Mantra's transliteration in English

ṛbhur na indraḥ śavasā navīyān ṛbhur vājebhir vasubhir vasur dadiḥ | yuṣmākaṁ devā avasāhani priye 'bhi tiṣṭhema pṛtsutīr asunvatām ||

The Pada Paath (Sanskrit)

ऋभुः । नः । इन्द्रः । शवसा । नवीयान् । ऋभुः । वाजेभिः । वसुऽभिः । वसुः । ददिः । युष्माकम् । देवाः । अवसा । अहनि । प्रिये । अभि । तिष्ठेम । पृत्सुतीः । असुन्वताम् ॥

The Pada Paath - transliteration

ṛbhuḥ | naḥ | indraḥ | śavasā | navīyān | ṛbhuḥ | vājebhiḥ | vasu-bhiḥ | vasuḥ | dadiḥ | yuṣmākam | devāḥ | avasā | ahani | priye | abhi | tiṣṭhema | pṛtsutīḥ | asunvatām

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-008

MANTRA NUMBER:

Mantra 8 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 3 of Varga 31 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 39 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

निश्चर्मण ऋभवो गाममपिंशत सं वत्सेनासृजता मातरं पुनः । सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥

The Mantra without meters (Sanskrit)

निश्चर्मण ऋभवो गाममपिंशत सं वत्सेनासृजता मातरं पुनः । सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितराकृणोतन ॥

The Mantra's transliteration in English

niś carmaṇa ṛbhavo gām apiṁśata saṁ vatsenāsṛjatā mātaram punaḥ | saudhanvanāsaḥ svapasyayā naro jivrī yuvānā pitarākṛṇotana ||

The Pada Paath (Sanskrit)

निः । चर्मणः । ऋभवः । गाम् । अपिंशत । सम् । वत्सेन । असृजत । मातरम् । पुनरिति । सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥

The Pada Paath - transliteration

niḥ | carmaṇaḥ | ṛbhavaḥ | gām | apiṃśata | sam | vatsena | asṛjata | mātaram | punar iti | saudhanvanāsaḥ | su-apasyayā | naraḥ | jivrī | iti | yuvānā | pitarā | akṛṇotana

Link: www.vedakosh.com/rig-veda/mandal-1/sukta-110/mantra-rig-01-110-009

MANTRA NUMBER:

Mantra 9 of Sukta 110 of Mandal 1 of Rig Veda
Mantra 4 of Varga 31 of Adhyaya 7 of Ashtak 1 of Rig Veda
Mantra 40 of Anuvaak 16 of Mandal 1 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कुत्सः आङ्गिरसः

देवता (Devataa) :- ऋभवः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

वाजे॑भिर्नो॒ वाज॑सातावविड्ढ्यृभु॒माँ इ॑न्द्र चि॒त्रमा द॑र्षि॒ राधः॑ । तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑तिः॒ सिन्धुः॑ पृथि॒वी उ॒त द्यौः ॥

The Mantra without meters (Sanskrit)

वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

The Mantra's transliteration in English

